CC-0. In Public Domain. Digitization by eGangotri

व्यावहारिकं संस्कृतम्

द्वितीयम् पुस्तकम्



59.2ㄥ
आ ४४व्या

स्वाद्ध्यायशाला

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

व्यावहारिकं संस्कृतम्

द्वितीयम् पुस्तकम्

पथिकृत्
शिवराज आचार्यः कौण्डिन्न्यायनः
आचार्यः, एम्. ए., विद्यावारिधिः (पि-एच्. डि.), वाचस्पतिः (डि.लिट्.)

रचयिता
प्रमोदवर्धनः कौण्डिन्न्यायनः मीमांसाचार्यः

स्वाद्ध्यायशाला
२०५३

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकम्-
स्वाद्ध्यायशालाकुटुम्बम्

प्रथमं संस्करणम् - २२०० पुस्तकानि
२०५३

मूल्यम्- ३०।- (त्रिंशद् रूप्यकाणि)

पुस्तकप्राप्तिस्थानम्-
स्वाद्ध्यायशाला, १६८, शिवभक्तमार्गः,
(च. २/४१९, सरस्वतीमार्गः)
लाजिम्पाट् , काष्ठमण्डपनगरम्-२,
नेपालदेशः ।
दूरस्वनः४४३३३२७
Email: svadhyaya@hotmail.com

४५१.२५
आ ४४.७१

मुद्रकः - नेपाल-प्रिण्टिङ्ग-सपोर्ट-मुद्रणालयः, रामशाहपथः, दूरस्वनसङ्ख्या ४२०४७४

दर्ता नं.
१५०३६८

CC-0. In Public Domain. Digitization by eGangotri

विषयानुक्रमणिका

भूमिका

१) संस्कृतवाङ्मयस्य महत्त्वम् (४)

२) अस्याः व्यावहारिक-संस्कृतपाठ्यपुस्तकमालायाः प्रकाशने उद्देश्यम् (५)

३) व्यावहारिक-संस्कृत-पाठ्यपुस्तकमाला-प्रकाशनकोष-व्यवस्था (५)

४) संस्कृतस्य शुद्धमुच्चारणं संस्कृतभाषा च (६)

५) पठनपाठन-प्रक्रिया (९)

६) साधुवादार्पणम् (१०)

स्तोत्राणि १

(क) ब्रह्मस्तोत्रम् (ख) विष्णुस्तोत्रम् (ग) रुद्रस्तोत्रम् (घ) गणेशस्तोत्रम् (ङ) सरस्वतीस्तोत्रम्

१) प्रथमः पाठः	प्रथमायाः विभक्तेः प्रयोगः	३
२) द्वितीयः पाठः	द्वितीयायाः विभक्तेः प्रयोगः	६
३) तृतीयः पाठः	तृतीयायाः विभक्तेः प्रयोगः	८
४) चतुर्थः पाठः	चतुर्थ्याः विभक्तेः प्रयोगः	१०
५) पञ्चमः पाठः	पञ्चम्याः विभक्तेः प्रयोगः	१२
६) षष्ठः पाठः	षष्ठ्याः विभक्तेः प्रयोगः	१५
७) सप्तमः पाठः	सप्तम्याः विभक्तेः प्रयोगः	१८
८) अष्टमः पाठः	सम्बोधन-विभक्तेः प्रयोगः	२२
९) नवमः पाठः	दीर्घसन्धिः	२४
१०) दशमः पाठः	वर्तमाने लटः प्रयोगः	२५
११) एकादशः पाठः	भूते लुङ्-लङ्-लिटां प्रयोगः	२६
१२) द्वादशः पाठः	भविष्यति लृट्-लुटोः प्रयोगः	२७
१३) त्रयोदशः पाठः	विशेषणानां प्रयोगः	२८
१४) चतुर्दशः पाठः	एतद्-इदम्-अदस्-प्रातिपदिकानां प्रयोगः	३०
१५) पञ्चदशः पाठः	तत्प्रातिपदिकस्य प्रयोगः	३४
१६) षोडशः पाठः	क्त्वाप्रत्ययान्तानां प्रयोगः	३७
१७) सप्तदशः पाठः	ल्यबन्तानां प्रयोगः	३९
१८) अष्टादशः पाठः	तुमुन्प्रत्ययान्तानां प्रयोगः	४१
१९) ऊनविंशः पाठः	सङ्ख्याविशेषणानां प्रयोगः	४३
२०) विंशः पाठः	प्रातःकालवर्णनम् (बालकविता)	४५
२१) एकविंशः पाठः	हिमालयः (बालनिबन्धः)	४६
२२) द्वाविंशः पाठः	हंस-काक-धानुष्कपथिकानां कथा (बालकथा)	४८
२३) त्रयोविंशः पाठः	छात्रयोः संवादः	५०
२४) चतुर्विंशः पाठः	नीतिपद्यानि	५२

परिशिष्टम्

(१) प्रातिपदिकरूपावलिः ५३, (२) धातुरूपावलिः ५९, (३) गुणनसारणी ७६,
(४) वैदिकशास्त्रपरिचयः ७७, (५) लगधमुनिप्रोक्तवेदाङ्गज्योतिषानुकूलं कालज्ञानम् ७७,
(६) विद्यासु उपवेदेषु च आयुर्वेदः ७८ ।

CC-0. In Public Domain. Digitization by eGangotri

भूमिका*

१. संस्कृत-वाङ्मयस्य महत्त्वम्

भूमण्डलस्य यस्मिन्कस्मिन्नपि भागे निवसतां सर्वेषां मानवानां कृते संस्कृतवाङ्मयस्य प्रभूतं महत्त्वमस्तीति सुविदितमेव ।

संस्कृते विद्यानां विविधा विधाः प्राप्यन्ते । वार्ताया विद्यायाः कृषिशास्त्रम् , पशुशास्त्रम् , वाणिज्यशास्त्रम् , स्थापत्यशास्त्रम् , आयुर्वेदशास्त्रम् इत्यादीनि अनेकानि शास्त्राणि, त्रय्या विद्याया वेदवेदाङ्गस्मृतिपुराणेतिहासादीनि धर्ममीमांसा-ब्रह्ममीमांसादीनि च शास्त्राणि, दण्डनीत्या विद्याया नीतिशास्त्रम् , प्रशासनशास्त्रम् , धनुर्वेदशास्त्रम् (आयुधशास्त्रम् , युद्धशास्त्रम्) इत्यादीनि शास्त्राणि, आन्वीक्षिक्या विद्यायास् तर्कशास्त्रम् , पदार्थशास्त्रम् , साङ्ख्य-शास्त्रम् , योगशास्त्रमित्यादीनि शास्त्राणि च संस्कृतवाङ्मये सन्ति । महाकविभासकालिदासादिप्रणीताः काव्य-नाट्य-कथा-ऽऽख्यायिकादिरूपा ललितकलाप्रधाना नानाविद्यासिद्धान्तगर्भा अनेके ग्रन्थाश्च संस्कृत-वाङ्मये सन्ति ।

एवं मानवानां कृते सार्वजनिकनिधिरूपेण स्थितं संस्कृतवाङ्मयमेतस्मिन् कोलाहलपूर्णे आधुनिके मानव-समाजे नैतिकताया मानवताया विश्वबन्धुतायाश्च प्रसारे महत्त्वपूर्णं भवितुं शक्नोतीति संस्कृतवाङ्मयस्योपनिषद्-गीतादिग्रन्थानां स्वल्पमपि परिचयं प्राप्तवतां जनानामतिरोहितम् । मानवजीवनरहस्यान्वेषणे संस्कृतवाङ्मयस्य सर्वोपकारकत्वमपि सुविदितमेव । वैदिक-सनातन-वर्णाश्रमधर्मानुयायिनां कृते तु वेदवेदाङ्गादि-संस्कृतवाङ्मयस्य महत्त्वं वर्णनातीतं वर्तते । हिन्दुभिः सह वर्तमानस्य वेदवेदाङ्गादि-संस्कृत-वाङ्मयसम्बन्धस्य सर्वथा विच्छेदः क्रियते तर्हि हिन्दूनां हिन्दुत्वमेवाऽपगच्छति । हिन्दूनां जन्मनः प्रभृति मरणं यावत् सर्वे धार्मिक-क्रियाकलापा वेदवेदाङ्गादि-संस्कृतवाङ्मयस्य एव आधारे संस्कृतभाषाया एव प्रयोगेण चैव क्रियन्ते ।

भारतवर्षनिवासिनां वैदिकानामार्याणां राष्ट्रियतायाः स्रोतो वेदादेव प्रवहति । तेषां नैतिकता संस्कृत-वाङ्मयेनैव प्रकाशिता भवति । तेषां मूलजीवनपद्धतिर् वेदैर्वेदाङ्गैश्चैव निर्दिष्टाऽस्ति । तेषामनादिकालात् प्रभृति प्रचलन्त्या विशिष्टायाः शिक्षापद्धतेः परम्परां स्थिरां कृत्वा तेषां राष्ट्रियतां बलीयसीं कर्तुं तेषां गौरवं वर्धयितुं च संस्कृतविद्यापरम्पराया विशिष्टा भूमिका भवति । तस्मात् तेषां कृते संस्कृतवाङ्मयस्य विशिष्टं महत्त्वमप्यस्ति ।

नेपालदेशनिवासिनां कृतेऽपि संस्कृतस्य महत्त्वं प्रभूतमस्ति । नेपालदेशस्य राष्ट्रभाषा संस्कृतमूलाऽस्ति । तस्याः समृद्धये संस्कृतस्याऽऽवश्यकता विद्यते । नेपालस्य धर्मसंस्कृति-प्रशासन-कलाकौशलादिसम्बद्धस्य इतिहासस्य महत्त्वपूर्णोऽशः संस्कृतभाषायामेव सुरक्षितो वर्तते । नेपालवासिषु मध्ये प्रभूततरेषु मनुष्येषु धर्मभावनायाः सांस्कृतिकभावनायाः नैतिकतायाः कलात्मकानुभूतेश्च सम्पादने चरित्रबलस्य अभिवर्धने च संस्कृतवाङ्मयस्य नितान्तमावश्यकता वर्तते । दैनन्दिनजीवनयात्रायाः कृतेऽपि बहुसङ्ख्यका नैपाला जना संस्कृतवाङ्मयज्ञानम् अपेक्षन्ते । तद् यथा, नैपाला जनाः

१) दैनन्दिनव्यवहारनीतेर् ज्ञानं कर्तुं हितोपदेश-पञ्चतन्त्र-चाणक्यनीतिदर्पणादीन् ग्रन्थानपेक्षन्ते ।

२) स्वधर्म-दर्शनज्ञानाय वेद-वेदाङ्ग-स्मृति-पुराण-रामायण-महाभारत-गीतादिग्रन्थानपेक्षन्ते ।

३) आयुर्वेद-ज्योतिषादिप्राच्यविज्ञानाध्ययने संस्कृतभाषायां लिखितानां ग्रन्थानामुपयोगं कुर्वते ।

४) संस्कृतपदपदार्थज्ञानेन नैपालीयभाषायाः प्रयोगे नैपुण्यं प्राप्नुवन्ति ।

५) नित्यनैमित्तिकादिकर्मसु आवश्यकानां वैदिकानां पौराणानां वा मन्त्राणां शुद्धरूपेणोच्चारणं शिक्षितुं संस्कृतपठनस्योपयोगं कुर्वते ।

संस्कृतवाङ्मयस्थविद्यानां परम्परायाः संरक्षणे समर्थानां विशिष्टानां शिक्षकाणाम् , साधारणशिक्षां प्राप्तवता जनेन कर्तुं शक्यानि समाजसेवाया राष्ट्रसेवायाश्च विविधानि कार्याणि कर्तुं समर्थानां स्वीय-धर्मसंस्कृतिपरम्परा-ऽऽचारविचारादरवतां संस्कृतवाङ्मय-परिचययुतानां संस्कृतमूलक-साधारणशिक्षां प्राप्तवतां समाजसेवकानां राष्ट्र-सेवकानां राष्ट्रनीतिसम्बद्धकार्य-कर्तॄणां राष्ट्रनेतॄणां च नेपालदेशे परमावश्यकता वर्तते । एतस्मात् कारणात् नेपालवासिनां कृते संस्कृतवाङ्मयस्याऽतीव महत्त्वं वर्तत इति स्पष्टं भवति ।

* एषा भूमिका शिक्षकाणाम् , अभिभावकानाम् , शिक्षाविदाञ्च कृते वर्तते, न तु विद्यार्थिनाम् । विशेषतस्तु एषा भूमिका शिक्षकाणां कृते वर्तते । तस्माच्च शिक्षकैः पूर्वमेतां भूमिकां पठित्वा संस्कृतभाषोच्चारणरीतिं पठनपाठनप्रक्रियां च बुद्ध्वा सामान्यतया एतदनुसारमेव शिक्षणं कर्तव्यम् ।

CC-0. In Public Domain. Digitization by eGangotri

अतः स्वम् आदर्शम्, धर्मम्, दर्शनम्, संस्कारम्, आचारम्, विचारम्, व्यवहारम्, वेषम्, स्वां भाषाम्, भूषाम्, नीतिम्, संस्कृतिम्, स्वराष्ट्रम्, स्वगौरवम्, स्वाभिमानञ्च रक्षितुमिच्छद्भिस् तेषु विषयेषु रममाणैश्च सर्वैर् भारतवर्षीयैरार्यैर् जनैः, विशेषतो नैपालैर् जनैः संस्कृतशिक्षाया विकासाय विस्ताराय सुदृढीकरणाय च यतितव्यम्। तादृशैर् जनैस् सह सामञ्जस्यपूर्णां स्वीयां जीवनयात्रां सञ्चालयितुमिच्छुकैरन्यैश्च जनैस् तत्र साहाय्यं कार्यम्।

२. अस्याः व्यावहारिक-संस्कृत-पाठ्यपुस्तकमालायाः प्रकाशने उद्देश्यम्

एषा व्यावहारिक-संस्कृत-पाठ्यपुस्तक-माला मुख्यतया संस्कृतभाषायाः शिक्षणायैव निर्मिता वर्तते। एतस्याः पठनेन नैपालीयाद्याधुनिक-भारतवर्षीय-भाषाणां परिष्कृते प्रयोगेऽपि क्षमता वर्धते। एषा व्यावहारिकसंस्कृत-पाठ्यपुस्तकमाला प्रथमादिदशमान्तानां कक्षाणां कृते लिख्यते। एतस्याः सम्पूर्णाया मालाया अध्ययने कृते जनाः शास्त्रीयं व्यावहारिकं च संस्कृतं बोद्धुं व्याहर्तुं लेखितुं च समर्था भवन्ति। पञ्चमकक्षापर्यन्तमेतस्याः संस्कृत-पाठ्यपुस्तकमालायाः पठनेन षष्ठकक्षायां संस्कृत-माध्यमिक-विद्यालये प्रवेशे सुकरता च भवति।

अस्माकं मते संस्कृतशिक्षायाः (१) धर्मदर्शनशिक्षा- (२) वेदवेदाङ्गस्मृतिपुराणादिशास्त्रशिक्षा- (३) ज्योतिषाऽऽयुर्वेदादि-प्राच्यविज्ञानप्रविधिशिक्षा- (४) संस्कृतग्रन्थमूलकसर्वजनोपयोगि-साधारणशिक्षारूपाश् चत्वारः पक्षाः सन्ति। तेषां सर्वेषां पक्षाणामनुकूलतया प्रमुखतया साधारणशिक्षाङ्गरूपा एषा माला प्रकाश्यमाना वर्तते। एवञ्च संस्कृतभाषायाः प्रचारणम्, स्वधर्मसंस्कृतिज्ञानविज्ञानकलासाहित्यसंरक्षणम्, संस्कृतशिक्षाविकासविस्तारसुदृढीकरणन् चैवास्याः पुस्तकमालायाः प्रकाशने उद्देश्यम्।

३. व्यावहारिकसंस्कृतपाठ्यपुस्तकमालाप्रकाशनकोषव्यवस्था

एतस्याः पुस्तकमालायाः प्रकाशनाय प्रारम्भे संस्कृतशिक्षाप्रेमिणां दानेनैव कोषव्यवस्था क्रियते। अनन्तरं पुस्तकानां विक्रयेण प्राप्तस्य द्रव्यस्यार्धांशस्य च कोषे समावेशः करिष्यते। प्रतिपुस्तकं पुस्तकमूल्यस्य चतुर्थोंऽशः पाठ्यपुस्तकस्य रचयित्रे परिव्ययत्वेन दास्यते। पुस्तकमूल्यस्य अन्यश् चतुर्थोऽशश्च पाठ्यपुस्तकप्रचारार्थं विनियोक्ष्यते। एवं क्रमेण प्रथमकक्षाप्रभृति दशमकक्षापर्यन्तं पञ्चमकक्षापर्यन्तमेव वा दश पञ्च वा पाठ्यपुस्तकानि प्रकाशयिष्यन्ते। एतदर्थम् अवरतो द्वे लक्षे (२,००,०००।-) रूप्यकाणाम् आवश्यके। तत्र एतस्य कोषस्य व्यवस्थां कर्तुं प्रथमपुस्तकप्रकाशनावसरे दत्ताद् दानादतिरिक्तं द्वितीयपुस्तकप्रकाशनावसरेऽधोनिर्दिष्टं दानं दत्तवद्भ्यो महानुभावेभ्यः स्वाद्ध्यायशालाकुटुम्बेन धन्यवादा उपह्रियन्ते।

१.	श्रीयुता प्रभालक्ष्मी राणा महोदया काष्ठमण्डप-लालदर्बारनिवासिनी	११९०१।-
२.	श्रीयुतः अर्जुनबहादुरसिंहमहोदयः काष्ठमण्डप-बालुआटारनिवासी	२५०५।-
३.	श्रीयुता खिलरत्नेश्वरी थापा महोदया काष्ठमण्डप-गैरिधारा-जोरपिपलनिवासिनी	२५००।-
४.	श्रीयुता हरिमायादेवी पौड्यालयमहोदया तनहुँ-मैबलनिवासिनी	२०००।-
५.	श्रीयुतः उपेन्द्रप्रसादभट्टराइमहोदयः काष्ठमण्डप-बालुआटारनिवासी	२०००।-
६.	श्रीयुतः मोहनप्रसादबाँसकोटामहोदयः काष्ठमण्डप-कमलपोखरिनिवासी	२०००।-
७.	श्रीयुतः जगदीशशमशेरराणामहोदयः काष्ठमण्डप-बत्तिसपुतलिनिवासी	२०००।-
८.	श्रीयुतः प्रीतिनाथप्याकुर्यालमहोदयः काष्ठमण्डप-ठमेलनिवासी	१००१।-
९.	श्रीयुतः हेमराजज्ञवाली महोदयः काष्ठमण्डप-महाङ्कालबौद्धनिवासी	१०००।-
१०.	श्रीयुतः कृष्णराजः अर्यालः महोदयः काष्ठमण्डप-गैरिधारानिवासी	१०००।-
११.	श्रीयुतः तुलसीप्रसादभट्टराइमहोदयः ओखलढुङ्गा-सेर्नानिवासी	१०००।-
१२.	श्रीयुतः केसरिराजपाण्डेमहोदयः काष्ठमण्डप-ढोकाटोलनिवासी	१०००।-
१३.	श्रीयुतः रवीन्द्रराजपाण्डेमहोदयः ललितपुर-सानेपानिवासी	१०००।-
१४.	श्रीयुतः पाइलट-कर्नेल-मदनबहादुर के.सी. महोदयः ललितपुर-लगनखेलनिवासी	१०००।-
१५.	श्रीयुतः इ. रामबहादुर के.सी. महोदयः काष्ठमण्डप-लाजिम्पाटनिवासी	१०००।-
१६.	श्रीयुता अङ्गूरबाबा जोशी महोदया काष्ठमण्डप-बागबजारनिवासिनी	१०००।-
१७.	श्रीयुता टीकामञ्जरी प्याकुर्यालमहोदया काष्ठमण्डप-मण्डिखाटारनिवासिनी	७५०।-
१८.	श्रीयुतः शैलेन्द्रकुमारगौतममहोदयः काष्ठमण्डप-लाजिम्पाटनिवासी	६००।-
१९.	श्रीयुतः डा. गोविन्दटण्डनमहोदयः काष्ठमण्डप-बत्तिसपुतलिनिवासी	५११।-
२०.	श्रीयुतः दामोदरकोइरालामहोदयः ललितपुर-जाउलाखेलनिवासी	५०५।-

CC-0. In Public Domain. Digitization by eGangotri

२१. श्रीयुता इन्दिरा मल्लमहोदया काष्ठमण्डप-लाजिम्पाटनिवासिनी ५०५।-
२२. श्रीयुतः कुलशेखरशर्मा महोदयः काष्ठमण्डप-बानेश्वरनिवासी ५०२।-
२३. श्रीयुतः रामबाबुपन्तमहोदयः काष्ठमण्डप-ज्ञानेश्वरनिवासी ५०१।-
२४. श्रीयुतः निरोधराजपाण्डेमहोदयः काष्ठमण्डप-ज्ञानेश्वरनिवासी ५०१।-
२५. श्रीयुता मीना सिग्देलमहोदया काष्ठमण्डप-चाबहिलनिवासिनी ५०१।-
२६. श्रीयुता सूगीयादेवी रौनियारमहोदया सप्तरी-कञ्चनपुरनिवासिनी ५०१।-
२७. श्रीयुतः डा. दण्डपाणिपौडेलमहोदयः तनहुँ-मैबल-बारिफाँटनिवासी ५०१।-
२८. श्रीयुतः मुकुन्दशरण उपाध्यायः महोदयः पोखरानिवासी ५०१।-
२९. श्रीयुतः शिवगोपालरिसालमहोदयः ललितपुर-जाउलाखेलनिवासी ५०१।-
३०. श्रीयुतः श्रीकण्ठशर्मा पोखरेलः महोदयः ललितपुर-लगनखेलनिवासी ५०१।-
३१. श्रीयुतः केदारप्रसादशर्मा महोदयः काष्ठमण्डप-मण्डिखाटारनिवासी ५०१।-
३२. श्रीयुतः विदुरविक्रमसिंहः अधिकारी महोदयः काष्ठमण्डप-सिफलनिवासी ५०१।-
३३. श्रीयुतः मेजर-कृष्णबहादुरखड्कामहोदयः काष्ठमण्डप-मालिगाउँनिवासी ५०१।-
३४. श्रीयुतः अच्युतरमणः अधिकारी महोदयः काष्ठमण्डप-घट्टेकुलोनिवासी ५०१।-
३५. श्रीयुतः केदारकुमारराजभण्डारी महोदयः काष्ठमण्डप-कमलपोखरिनिवासी ५०१।-
३६. श्रीयुतः भुवनदेवपन्तमहोदयः काष्ठमण्डप-पुतलिसडकनिवासी ५००।-
३७. श्रीयुतः मधुसूदनढकालमहोदयः काष्ठमण्डप-चण्डोलनिवासी ५००।-
३८. श्रीयुता गुणराज-"रामदास"-पत्नी काष्ठमण्डप-त्रिपुरेश्वरनिवासिनी ५००।-
३९. श्रीयुतः रमेशखकुरेलमहोदयः काष्ठमण्डप-कमलपोखरिनिवासी ५००।-
४०. श्रीयुतः हरिप्रसादपौडेलमहोदयः ललितपुर-इमाडोलनिवासी ५००।-
४१. श्रीयुतः सुन्दरप्रसादशाहमहोदयः काष्ठमण्डप-ज्ञानेश्वरनिवासी ५००।-
४२. श्रीयुतः सोमनाथोपाध्यायघिमिरेव्यासमहोदयः काष्ठमण्डप-टङ्गालनिवासी ५००।-
४३. श्रीयुतः हरिप्रसादपौड्यालयमहोदयः काष्ठमण्डप-चण्डोलनिवासी ५००।-
४४. श्रीयुतः राधारमण उपाध्याय आचार्यः महोदयः काष्ठमण्डप-बानेश्वरनिवासी ५००।-
४५. श्रीयुतः कमलमणिदीक्षितमहोदयः ललितपुर-पाटननिवासी ५००।-
४६. श्रीयुतः सुरेन्द्रसिंहखत्री महोदयः काष्ठमण्डप-डिल्लिबजारनिवासी ५००।-
४७. श्रीयुतः डा. कमलप्रकाशमल्लमहोदयः काष्ठमण्डप-मैतिदेवीनिवासी ५००।-
४८. श्रीयुतः द्वारिकाश्रेष्ठमहोदयः काष्ठमण्डप-पानिपोखरिनिवासी ५००।-
४९. श्रीयुता कुमारी सत्या लिम्बुतुम्बाहाङ्गफेमहोदया धरान-भोटेपुलनिवासिनी ५००।-
५०. श्रीयुता विमला लोहनी महोदया काष्ठमण्डप-भाटभटिनिनिवासिनी ५००।-
५१. श्रीयुतः पीताम्बर आचार्यः महोदयः काष्ठमण्डप-फर्पिङनिवासी ५००।-
५२. श्रीयुतः योगनाथपौडेलमहोदयः काष्ठमण्डप-बालुआटारनिवासी ५००।-
५३. श्रीयुतः मधुसूदनज्ञवाली महोदयः काष्ठमण्डप-ज्ञानेश्वरनिवासी ५००।-
५४. श्रीयुतः गोपालप्रसादघिमिरेमहोदयः काष्ठमण्डप-टङ्गालगैरिधारानिवासी ५००।-
५५. श्रीयुतः मोहनप्रसादघिमिरेमहोदयः काष्ठमण्डप-धुम्बाराहि-चाबहिलनिवासी ५००।-
५६. अन्ये उदारा महानुभावाः ६६१।-

४. संस्कृतस्य शुद्धम् उच्चारणम् , संस्कृतभाषा च

इदानीं संस्कृतज्ञनिकाये आ, ई, ऊ, ऋ, ॠ, ऌ, ॡ, ए, ओ इत्येतेषां स्वरवर्णानाम् , अं, अः इत्येतयोरयोगवाहवर्णयोः, न, व, श, ष इत्येतेषां योगवाहव्यञ्जनवर्णानाम् उच्चारणे श्रुतौ च अबोधो भ्रमश्च व्यापको वर्तते। पण्डिता अपि प्रायेण उक्तानां वर्णानां शुद्धम् उच्चारणं न जानन्ति। अत उपर्युक्तानां वर्णानाम् उच्चारणे अशुद्धिं कुर्वाणाः संस्कृतपाठकाः सर्वत्र दृश्यन्ते, तथैव च य इत्यस्य ज्य इति क्ष इत्यस्य छ्य इति ज्ञ इत्यस्य ग्यँ द्न न्य इत्यादिकम् अशुद्धम् उच्चारणं च प्रचलितं दृश्यते। एतादृशमुच्चारणं शास्त्रसम्मतं नाऽस्ति। अत एतेषां शुद्धं शास्त्रसम्मतमुच्चारणं कर्तुं प्रयत्नः कर्तव्यः। लकार ऋकारयोगजाक्षरलिपेः लृ इत्यतः

CC-0. In Public Domain. Digitization by eGangotri

स्वतन्त्रस्वररूपस्य लृकारस्य लिपेर् भेदस्याऽप्रसिद्धत्वाच् च स्वररूपाल्लृकारस्वरूपविषये अपि पण्डिताः प्रायेण भ्रान्ताः प्राप्यन्ते। संस्कृतस्य शिक्षकाणां कृते उच्चारण-विषयेऽपि प्रशिक्षणव्यवस्था कर्तव्या। आकाशवाणी-द्वाराऽपि शुद्धमुच्चारणं प्रचारणीयम्। एतस्मिन् विषये संस्कृतशिक्षाप्रेमिभिरवधानन् देयम्।

संस्कृतभाषायां सन्धिः स्वाभाविकरूपेणाऽऽगच्छति। सन्धिं (सन्धिजविकारं वा) त्यक्त्वा पृथक्पृथक् पदानि सह रक्षित्वा वाक्यं निर्माय क्रियमाणं शिक्षणं संस्कृतभाषाया जीवतः प्रवाहस्य प्रतिकूलं वर्तते। तथापि सरलीकरणं व्यपदिश्य इदानीन्तन-संस्कृत-पाठ्यपुस्तक-लेखनादौ तेनैव प्रकारेण वाक्यप्रदर्शनस्य परिपाटी स्वीकृता दृश्यते। एतस्य प्रचलनस्य निरुत्साहनम् उचितं वर्तते। तथापि व्यवहारे सहसा परिवर्तनं कर्तुमशक्यं विलोक्य अस्माभिरपि एतस्मिन् द्वितीये पुस्तकेऽपि तस्याः परिपाट्याः किञ्चिदनुसरणं कृतमस्ति। भाषायाः सरलीकरणं खलु प्रसिद्धतराणां पदानां चयनेन जटिलानां वाक्यरचनानां यथासम्भवं परिहारेण च कार्यम्, न तु जीवतो भाषाप्रवाहस्य प्रतिकूलतया अस्वाभाविक्या भाषायाः प्रयोगेणेति पण्डितैर् विवेक्तव्यम्। एतस्मिन् विषये संस्कृतभाषावित्सु, संस्कृतशिक्षाप्रेमिषु, शिक्षावित्सु, शिक्षकेषु, विद्यार्थिषु चोचितायां चेतनायां जागरितायां पूर्णतया स्वाभाविकस्यैव संस्कृतस्य एतादृशे पाठ्यपुस्तके प्रयोगोऽस्माभिः कर्तुमिष्यते।

"कार्यङ् कुरुते, पत्त्रम् पठति" इत्यादिषु पदान्तस्थपञ्चमवर्णस्य स्थाने अनुस्वारस्यैव लेखनम्, उच्चारणे तु सर्वत्रैव मकारस्यैवोच्चारणम् इदानीन्तनैः प्रायः सर्वैरपि संस्कृतपाठकैः क्रियते। इयं रीतिः संस्कृतभाषायाः उच्चारणगतशुद्धेर् दृष्ट्या आपत्तिजनिका वर्तते। व्यञ्जने परे सति पदान्तमकारस्य अनुस्वारीभवनं यद्यपि पाणिनीयव्याकरणसम्मतम्, तथापि अनुस्वारस्य उच्चारणे प्रायः अशुद्धेः क्रियमाणत्वात् र-श-ष-स-ह-वर्णातिरिक्तेषु सर्वेष्वपि व्यञ्जनवर्णेषु परेषु अनुस्वारस्य परसवर्णीभावस्य मूलाया वैदिकसंस्कृतभाषाया अनुकूलतरत्वात् परसवर्णीभावपक्षस्यावलम्बनम् उचितम् आवश्यकं च वर्तते। कार्यङ् कुरुते, गान् ताडयति, पत्त्रम् पठति, विद्यालयय्ँ याति, लगुडल्ँ लाति, एडकाँश् चारयति इत्येतादृशेन रूपेण प्रयोगं कृत्वा लेखने उच्चारणे च साम्ये स्थापिते भाषाया लिखितः प्रयोगः सरलश्च भवति। उच्चारणप्रतिकूलस्य लेखनस्य शिक्षणे महत् काठिन्यं भवतीति सर्वैः शिक्षकैरनुभूतमेवाऽस्ति। तस्माद् वयम् एतस्य पक्षस्य प्रचाराय प्रयतमानाः स्मः। तथापि प्रचलनस्य प्राचुर्याद् इदानीं सर्वेषु व्यञ्जनेषु परेषु पदान्तमकारस्य अनुस्वारीकरणपक्ष एव लेखेऽङ्गीकृतः। तथापि परसवर्णपक्षस्य परिचयाय कतिपयेषु वाक्येषु परसवर्णोदाहरणानि प्रयुक्तानि सन्ति। शिक्षकैरेतां वस्तुस्थितिं बुद्ध्वा अनुस्वारस्य परसवर्णानां च उच्चारणगते भेदे विद्यार्थिनां ध्यानाकर्षणं कर्तव्यम्।

विसर्गस्योच्चारणेऽपि अशुद्धिकरणं व्यापकरूपेण प्राप्यते। विसर्गस्योच्चारणगतस्वरूपमपि बहुभिरज्ञातमेवाऽस्तीति ज्ञायते। विसर्गस्य खलु कखयोः परयोर् जिह्वामूलीयरूपेण, पफयोः परयोरुपध्मानीयरूपेण, शषसेषु परेषु परसवर्णरूपेणोच्चारणं स्वाभाविकतरं भवति। तस्मात् स्वाभाविक्यां व्यावहारिक्यां संस्कृतभाषायाम् एतस्यैव पक्षस्य अवलम्बनं समुचितं दृश्यते। तथाप्येतस्मिन् पक्षे उचितायाश्चेतनाया जागरणं यावन् न भवति तावत् प्रचलिता पद्धतिरेवाऽस्याम् पुस्तकमालायामप्यङ्गीक्रियते। एतद्विषयेऽपि उक्तं स्वाभाविकं पक्षमेव प्रचलने आनेतुं यथावसरं प्रयासः करिष्यते।

संस्कृतभाषायां व्यञ्जने परे सति स्वरात् परं व्यञ्जनं द्विरुच्यते। एतादृशं व्यञ्जनद्वित्वं स्वाभाविकं वर्तते। द्विर्भूतयोर् व्यञ्जनयोर् मध्ये प्रथमं व्यञ्जनं प्रायेण पूर्वस्याक्षरस्याऽङ्गं भवति द्वितीयञ्च परस्याऽक्षरस्याऽङ्गं भवति। यथा "वाक्क्यम्" इत्यत्र "वाक्-क्यम्" इति द्वे अक्षरे, "पट्ठ्यते" इत्यत्र "पट्-ठ्य-ते" इति त्रीण्यक्षराणि। यद्यपि "अनचि च (८।४।४७)" इति सूत्रेणाऽप्यन्वाख्यातो व्यञ्जनद्वित्वस्याऽयं पक्षः प्राय आधुनिके लेखेऽनुसृतो न दृश्यते, तथापि वेदेषु प्राचीनेषु केषु चन शिलाभिलेखेषु च लेखनेऽप्ययं पक्षोऽवलम्बितो दृश्यते, उच्चारणे तु प्रायो निरपवादतयाऽधुनाऽप्युपलभ्यते। तस्मादुच्चारणानुसारमेव लेखनं शिक्षार्थिनां बालकानां कृते सरलं भवतीति व्यञ्जनद्वित्वयुक्तं लेखनमेव स्वाभाविकतरं सरलं युक्तियुक्तञ्च भवति। तथाप्येतस्मिन् विषयेऽपि एतस्मिन् पुस्तकेऽधुना प्रचलिता व्यञ्जनद्वित्वाकरणरीतिरेवाङ्गीकृता, काठिन्यभ्रमादिपरिहारार्थम्। व्यञ्जनद्वित्व-प्रवृत्तिनिदर्शनाय नीतिश्लोकेषु व्यञ्जनद्वित्वं प्रयुक्तमस्ति, पद्योच्चारणे द्वित्वयुतोच्चारणस्य स्वाभाविकतरत्वात्। एतस्मिन् विषयेऽपि जागरणे जाते तु उच्चारणानुकूलमेव लेखनं प्रचारयितुं वयं प्रयतिष्यामहे।

उपर्युक्तेषु विषयेषु विशेषज्ञानं वाञ्छद्भिस् तद्विषये सम्यक् चिन्तनं कर्तुमिच्छद्भिर् जनैः स्वाद्ध्यायशाला-कुटुम्बेन प्रकाशितायाः कौण्डिन्न्यायनशिक्षाया अध्ययनं कृत्वा सम्बद्धविषयाणां मननं कर्तुमुचितमस्ति।

उपर्युक्तेषु विषयेषु प्रबोधे विवेके च सुकरतां कर्तुं सारण्या अपि ते विषयाः प्रस्तूयन्ते-

CC-0. In Public Domain. Digitization by eGangotri

सारणी

विषया:	इदानीं प्रचलित: पक्ष:		स्वाभाविकतरश् शुद्धश् च पक्ष:
	लेखे	उच्चारणे	लेखे उच्चारणे च
१. वर्णा:	ऋषि: लृकार: अंश: दु:खम् वनम् शिशु: षट्पद:	रिसिहि लिकारह् अम्सह् (अन्सह् , अङ्सह्) दुक्खम् ब(व्न)नम् सिसुहु स(ख)ट्पदह्	ऋषि: लृकार: अंश: दुᳵखम् वनम् शिशु: षट्पद:
२. संयोगा:	इक्षु: यज्ञ: आह्निकम् ब्राह्मण: बाह्य:	इच्छ्युहु यग्यँह् आन्हिकम् ब्राम्मणह् बाय्यह् (बाम्ह्यह्)	इक्क्षु: यज्ज्ञ: आहन्निकम् ब्राहम्मण: बाहय्य:
३. व्यञ्जनद्वित्वम्	वाक्यम् उच्यते पठ्यते कथ्यते प्राप्यते पश्यति मनुष्य: बालकस्य	बाक्क्यम् उच्च्यते पट्ठ्यते कत्थ्यते प्राप्प्यते पस्स्यति मनुस्स्य(क्ख्य)ह् बालकस्स्य	वाक्क्यम् उच्च्यते पट्ठ्यते कत्थ्यते प्राप्प्यते पश्श्यति मनुष्ष्य: बालकस्स्य
४. सन्धि:			
(क) स्वरसन्धि:	माता अस्ति इति अभणीत्	माता अस्ति इति अभणित्	मातास्ति इत्त्यभणीत्
(ख) व्यञ्जनसन्धि: तृतीयवर्णभाव: नकारविकार: मकारानुस्वार- परसवर्णभाव:	 चित्रकात् बिभेति एडकान् चारयति कार्यं कुरुते चक्राभ्यां चलति ढक्कां नादयति गां ताडयति पत्रं पठति विद्यालयं याति लगुडं लाति घटिकां विलोकयति	 चित्त्रकाद् बिभेति एडकान् चारयति कार्यम् कुरुते चक्क्राभ्याम् चलति ढक्काम् नादयति गाम् ताडयति पत्त्रम् पठति बिद्द्यालयम् याति लगुडम् लाति घटिकाम् बिलोकयति	 चित्त्रकाद् बिभेति एडकाँश् चारयति कार्यङ् कुरुते चक्क्राब्भ्यान् चलति ढक्कान् नादयति गान् ताडयति पत्त्रम् पठति विद्द्यालयँय् याति लगुडल्ँ लाति घटिकावँ विलोकयति
मकारानुस्वारभाव:	बालकं रक्षति बालकं शाययति कालं षट्पदं पश्यति छत्रं समादत्ते धनं हरते	बालकम् रच्छ्युयति बालकम् साययति कालम् स(ख)ट्पदम् पस्स्यति छत्त्रम् समादत्ते धनम् हरते	बालकं रक्क्षति बालकं शाययति कालं षट्पदम् पश्श्यति छत्त्रं समादत्ते धनं हरते
विसर्गजिह्वामूलीयभाव: विसर्गोपध्मानीयभाव: विसर्गशकारभाव: विसर्गषकारभाव: विसर्गसकारभाव: विसर्गौकारभाव: विसर्गरेफभाव:	बालक: किं कुरुते बालक: पठति शकट: चक्राभ्यां चलति बालक: शेते बालक: टेकते बालक: षट्पदं पश्यति बालक: तिष्ठति बालक: सन्तुष्यति कुक्कुर: धावति घोटक: अपि धावति अग्नि: ज्वलति	बालकह् किम् कुरुते बालकह् पठति सकटह् चक्क्राभ्याम् चलति बालकह् सेते बालकह् टेकते बालकह् स(ख)ट्पदम् पस्स्यति बालकह् तिष्ठति बालकह् सन्तुस्स्यति कुक्कुरह् धाब(व्न)ति घोटकह् अपि धाब(व्न)ति अग्निहि ज्व्नलति	बालकᳵ किङ् कुरुते बालकᳵ पठति शकटश् चक्क्राब्भ्यान् चलति बालकश् शेते बालकष् टेकते बालकष् षट्पदम् पश्श्यति बालकस् तिष्ठति बालकस् सन्तुष्ष्यति कुक्कुरो धावति घोटकोऽपि धावति अग्निर् ज्वलति

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतस्य शास्त्रीयेषु ग्रन्थेषु उच्चकोटिक-साहित्यिक-ग्रन्थेषु च प्रयुक्तानां प्रातिपदिकानां धातूनाञ्चाऽपेक्षया नैपालीयाद्याधुनिक-भाषाणां निकटवर्तिनां संस्कृतभाषायाः प्रातिपदिकानां धातूनाञ्च प्रयोगः नैपालीयभाषादिभाषिणां बालकानां कृते सरलो भवतीति आरम्भिककक्षापुस्तकेषु तादृशानामेव प्रातिपदिकानां धातूनाञ्च मुख्यतया प्रयोगस्य सरणिं गृहीत्वा एतत् पाठ्यपुस्तकं विरचितं वर्तते ।

एतत्, इदम्, अदस्, तत् इत्येतेषां प्रातिपदिकानां प्रयोगे "इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम्। अदसस् तु विप्रकृष्टं तदिति परोक्षे विजानीयात्" इत्यादिका वस्तुस्थितिर् निरन्तरं स्मृता वर्तते ।

अन्यैः संस्कृतपाठ्यपुस्तकलेखकैः सरलीकरणं व्यपदिश्य भूतार्थे अद्यतनेऽपि लङ्लकारस्य प्रयोगः क्रियते । किन्तु तादृशः प्रयोगः संस्कृतभाषायाः पाणिनीय-व्याकरणान्वाख्यातस्य स्वभावस्य प्रतिकूलोऽस्ति । तस्मादस्माभिः संस्कृतभाषायाः पाणिनीय-व्याकरणान्वाख्यात-स्वभावमनुसृत्याऽत्र सामान्ये भूते लुङ्लकारस्य प्रयोगः कृतो वर्तते । भूतविशेषे यथायथं लङो लिटो वा प्रयोगोऽपि निदर्शनरूपेण कृतोऽस्ति ।

अत्र प्रातिपदिकविभक्त्यव्ययादीनां प्रयोगे भाषागत-स्वाभाविकताया अनुसरणं सावधानतया कृतं वर्तते । अभ्यासवर्धनाय पूर्वस्मिन् पाठे पठितानां पदानां वाक्यानां चोत्तरस्मिन् पाठेऽपि यथौचिति प्रयोगः कृतोऽस्ति ।

पुल्ँलिङ्गकेषु प्रातिपदिकेषु अस्मिन् पाठ्यपुस्तके अकारेकारोकारान्त-प्रातिपदिकानामेव प्रचुरतया समावेशः कर्तव्य इति नैपालीय-भाषाभाषिबालकानां कृते शिक्षणे सुगमान्यपि धनी इत्यादिकानि प्रातिपदिकरूपाणि त्यक्त्वा धनिक इत्यादीनि प्रातिपदिकरूपाणि प्रयुक्तानि सन्ति । हिण्डते छुपति इत्यादिकाः प्रयोगा इदानीमुपलभ्यमाने संस्कृतवाङ्मये अप्रचलिताः, तथापि नैपालीयाद्याधुनिकभाषाणां निकटे स्थिताः पाणिनीयधातुपाठसम्मताश् चेति हेतो-रत्र पाठ्यपुस्तकमालायां परिगृहीताः । एवमेव अमरकोषादिप्रचलितकोषेषु अनुपलभ्यमानान्यपि कौण्डक-चित्रकपोत-चूडिका-ऽषाडवराग-दोरक-झरणक- सेविकाऽऽदि-प्रातिपदिकान्यपि आवश्यकतानुसारं यथास्थानं प्रयुक्तानि ।

बालानां कृते सुबोधानां दैनन्दिने व्यवहारे आगन्तॄणाम् अपि पदार्थानां वाचकानि कानि चन पदानि तु संस्कृतभाषाया इदानीं दैनन्दिन-लौकिकव्यवहाराद् अपसृतत्वात् शिक्षकाणामपि कृते दुर्बोधानि स्युरिति तेषां सपर्यायाणाम् उल्लेखोऽत्र क्रियते– *कृष्णमृगः = कृष्णसारः, अजिनम् = चर्म, सुकूर्चकः = शोभनश्मश्रुकः, कुसुम्भः = कमण्डलुः, वन्दारुः = अभिवादकः, मन्दारः = पारिजातः, बन्धुरः = मनोहरः, सिन्धुराननः = गजाननः, मधुकरी = मधुमक्षिका, हिण्डामहे = चलामः, प्रतिमुञ्चते = परिधत्ते, विह्वयते = आह्वयति, कौण्डकम् = कुण्डे पाचितं पशुखाद्यम्, चित्रकपोतः = ढुकुर्कुरः, चूडिका = काचवलयः, अषाडवरागः = कट्वम्ललवणप्रधानोऽवदंशविशेषः, कण्टकिफलम् = पनसम्, जतूका = अजिनपत्रा, मर्कटकः = ऊर्णनाभः, दोरकः = रज्जुः, गलकम्बलः = सास्ना, झरणकाः = निर्झराः, सेविकम् = सेवसदृशफलविशेषः, मिष्टखादिका = सुखभक्षिका = लड्डूकादिकं मधुरं खाद्यं वस्तु, तिर्यक्सङ्ग्रहालयः = पशुपक्षिसरीसृपसङ्ग्रहालयः, क्षैरेयम् = पायसः, मार्गणः = याचकः, स्वाणुकः = लघुकः, लुग्नम् = स्यूतं वसनम्, लगयति = परिधत्ते, शुष्क्यति = शुष्कं कुरुते, चक्रकटी = चक्राकारा कटी, खाद्यकम् = लघुभोज्यम्, पल्वलम् = अल्पं सरः, तालकम् = कपाटनिरोधनयन्त्रम्, पिशीलकम् = लघु स्थालम्, तालिका = कुञ्चिका, पाटला = श्वेतरक्ता, पतङ्गः = सूर्यः, अनुश्रवः = वेदः, धानुष्कः = धन्वी, झोलिका = गोणीतरी, केलकम् = कदलीफलम्, मकायः = मर्कटान्नम्, किंशुकः = पलाशः ।*

वैदिकशास्त्रपरिचयस्य लगधप्रोक्तवेदाङ्गज्योतिषानुकूलकालज्ञानस्य उपवेदान्तर्गतस्याऽऽयुर्वेदस्य च पद्यात्मकानि लघूनि प्रकरणानि शास्त्ररसिकानां जनानां विशेषत उपयोगाय वैदिकमूलशास्त्रपरिचयाय च समावेशितानि सन्ति । तत्र वैदिकमासानां सूर्यायणापेक्षिचान्द्रमासत्वं च विशेषतः स्फुटीकृतं वर्तते। षष्टेः संवत्सराणां विषये संवत्सरपरिवत्सरादिवत्सरज्ञानविषये च विचारः प्रस्तुतोऽस्ति ।

५. पठन-पाठन-प्रक्रिया

अत्र ब्रह्म-विष्णु-रुद्र-गणेश-सरस्वतीस्तोत्राणि अवश्यपठनीयत्वेन सङ्गृहीतानि न सन्ति । तथापि शिक्षकैः अभिभावकैश्च तानि यथारुचि परिग्रहीतुं शक्यन्ते ।

१) पाठनायैकं पुस्तकं शिक्षकेण स्वहस्ते एव धारणीयम्, २) अत्र दत्तानां पाठानां विभागं कृत्वा एकस्मै दिनाय एकः उपपाठः कल्पनीयः, ३) एकस्मिन् दिने सामान्यतया पञ्चषाणि वाक्यानि पाठनीयानि, ४) तत्र कक्षायां सर्वप्रथमं शिक्षकेण तस्य दिवसस्य पाठो धीरेण गम्भीरेण स्वरेण विलम्बितया वृत्त्या स्फुटतया सर्वश्राव्यतया त्रिवारं श्रावणीयः, ५) ततः अर्थश्च बोधयितव्यः, ६) अर्थः प्रयोगेणैव बोधयितव्यः, अत्यन्ता-ऽवश्यकत्वे एव अनुवाद आश्रयणीयः, ७) ततो विद्यार्थिभिरपि एकैकशः कृत्वा उच्चारणं कारयितव्यम् ८) उच्चारणे विद्यार्थिभिः प्रत्येकं कृता दोषाः संशोध्याः, ९) ततः शिक्षकेण एकस्मिन् वाक्ये उच्चारिते तदनुसारमेव सर्वैर् विद्यार्थिभिस् तद् वाक्यम् उच्चारणीयम्, एवं बहुवारं कर्तव्यम्, १०) ततो

CC-0. In Public Domain. Digitization by eGangotri

विद्यार्थिभिरर्थोऽवबुद्ध उत न इति परीक्षा कर्तव्या, ११) यदि एकेन विद्यार्थिना अर्थो नाऽवबुद्धोऽवगम्यते तदा तं वाक्यार्थो बोधयितव्यः, यदि सर्वैरेवार्थो नाऽवबुद्धोऽवगम्यते तदा स पाठः पुनः पाठयितव्यः, १२) पुस्तके दत्तान् प्रश्नान् शिक्षकेण पृष्ट्वा विद्यार्थिभ्य उत्तराणि ग्रहीतव्यानि, १३) शिक्षकेण यथासम्भवं क्रिया-सम्पादनादेशादिना व्यवहारद्वाराऽपि विद्यार्थिनां संस्कृतभाषाबोधः कारयितव्यः, तदर्थम् उपविश, उत्तिष्ठ, जालम् उद्घाटय, द्वारं पिधेहि, पाठम् पठ, कालपट्टं विलोक्य, चित्रं लिख, स्वनाम लिख, अभ्यन्तर् आगच्छ, बहिर् गच्छ, अर्थम् अज्ञासीः ? अर्थं भण इत्यादिकानां वाक्यानां प्रयोगः कर्तव्यः। तादृशानां वाक्यानां मौखे प्रयोगे विद्यार्थिनोऽपि प्रोत्साहनीयाः। यथासम्भवं विद्यार्थिभिः सह सर्वोऽपि संलापः संस्कृतभाषयैव कर्तव्यः।

सुदीर्घपरम्परागतासु रागात्मकगेयतायुतासु पद्यबद्धरचनासु अत्यन्तगभीरभाववत्सु सुभाषितेषु च विद्यार्थिनामभिरुचिं जागरितां कर्तुमत्र स्वल्पानि काव्यपद्यानि नीतिपद्यानि च दत्तानि सन्ति। बाल्यात् प्रभृत्येव बालकाः एतादृशानां पद्यानां लयबद्धतया पठनस्याऽभ्यासं कुर्युस्तर्हि ते स्वपरम्परातः अपगता न स्युरिति एतानि पद्यानि अत्र सङ्गृहीतानि सन्ति। कक्षायाम् एतेषां पद्यानां श्रावणं शिक्षकेण भूयोभूयः कार्यम्। एतेषां पद्यानां कण्ठस्थीकरणे विद्यार्थिनः प्रोत्साहनीयाः। अत्र अन्यदीयेषु अपि पद्येषु क्व चिद् आवश्यकं परिवर्तनमपि कृतमस्ति। एतेषु पद्येषु भाषिक-दृष्ट्या कक्षानुरूपताया अभावोऽपि अस्माभिः सोढव्य एव। अत्र अर्थावबोधनमपि गौणमेवेदानीम्।

अस्मिन् पुस्तके परिशिष्टे अष्टानां प्रातिपदिकानां सर्वासु विभक्तिषु सर्वेषु वचनेषु च रूपाणि दत्तानि सन्ति। तथा च त्रयोदशानां धातूनां सप्तानां लकाराणां सर्वेषु पुरुषेषु सर्वेषु वचनेषु च रूपाणि दत्तानि सन्ति। एतानि रूपाणि प्रातिपदिक-धातु-रूपाणीत्थमागच्छन्ति इति बोधाय दत्तानि सन्ति, न अनिवार्यतया कण्ठस्थीकरणाय। कानि चन वैदिकानि रूपाण्यपि तत्रतत्र कोष्ठकेषु सूक्ष्मैरक्षरैर् दत्तानि सन्ति। तेषां यथारुचि अभ्यासः कर्तव्यः कारयितव्यश्च। रूपावल्याष् टिप्पणीषु दिक्प्रदर्शनाय प्रस्तुतानि रूपविशेषप्रयोगयुतानि पद्यानि च विद्यारसिकैः कण्ठस्थीकर्तुं कण्ठस्थीकारयितुं चोचितानि। दत्त-प्रातिपदिकरूपावली-धातुरूपावल्योरभ्यासे कृते तयोरुपयोगं कृत्वा पाठ्यपुस्तकप्रदर्शितमार्गेण अन्या अपि वाक्यरचनाः कर्तुं कारयितुं च शक्यन्ते।

परिशिष्टेषु येऽन्ये विषयाः समाविष्टाः सन्ति ते वैदिकशास्त्राणां सामान्यं परिचयं प्राप्तुमिच्छुकानां वैदिकीं कालगणनापरिपाटीम् आयुर्वेदीयं स्वोपयोगि किञ्चिद् ज्ञानं च लब्धुमिच्छुकानां कृतेऽत्र समाविष्टाः सन्ति। ते विषयाः अनिवार्यतया शिक्षणीया न सन्ति। यः अभिभावकः विद्यालयो वा इच्छति स एतस्य भागस्यापि पाठनं कर्तुं शक्नोति। एतेषां विषयाणाम् अपि स्वेच्छया कण्ठस्थीकरणं क्रियते तर्हि तद् अत्यन्तम् उपयोगि भवेत्।

आत्मनः बालकान् गम्भीररूपेण संस्कृते प्रवृत्तान् कर्तुं ये वाञ्छन्ति ते समीपस्थे विद्यालये संस्कृतपाठनस्य स्वाभीष्ट-रूपायां व्यवस्थायामसत्यामपि स्वगृहे एव एतां व्यावहारिक-संस्कृत-पाठ्यपुस्तकमालां प्रारम्भतः क्रमेण पाठयित्वा स्वोद्देश्यं प्राप्तुं शक्नुवन्तु इति विचार्य तदनुकूलतां विधातुम् अत्र प्रथमे पुस्तके गणेशस्तोत्रादिकं सर्वं समाविष्टमस्ति, वर्णमाला-सम्बद्धा सामग्री च दत्ता वर्तते, परिशिष्टञ्च योजितमस्ति। विद्यालया अपि एतान् विषयान् स्वेच्छया परिग्रहीतुं शक्नुवन्ति।

एषोऽस्माकं संस्कृत-शिक्षणरीतेः स्वगृहाद् बहिः प्रयोगस्य द्वितीयः प्रयासो वर्तते। अतोऽत्र अनुभवस्य न्यूनतया बहवो दोषाः प्रविष्टा भवेयुः। तन्निराकरणाय संस्कृतशिक्षाविदां शिक्षकाणामभिभावकानां च सहयोगः प्रार्थ्यते।

६. साधुवादार्पणम्

एतस्य पुस्तकस्य रचनायां सर्वविधानि निर्देशनानि दत्त्वा एतत् पुस्तकमेतादृशरूपेण निष्पन्नं कर्तुं पथप्रदर्शनं कृतवतां सुगृहीतनाम-पूजनीय-तातपादानामाचार्यशिवराजकौण्डिन्न्यायनमहोदयानां सान्निध्यमेवैतस्य पुस्तकस्य प्रकाशने सर्वदा सर्वथा प्रेरकं सफलतामूलं चास्तीति विज्ञापयामि।

एतस्य पुस्तकस्य मुद्रणाय दानसङ्कलन-सुसङ्गमकयोजन-मुद्रणादिकार्याणां सुसम्पादने विशिष्टं नियामकत्वं कृत्वा एतस्य पुस्तकस्य एतादृशरूपेण प्रकाशने महत् कार्यं कृतवतः श्रीमतः अग्रजान् आमोदवर्धनकौण्डिन्न्यायन-महोदयान् प्रति कृतज्ञतां व्यक्तीकरोमि। प्रमुद्रणसंशोधनादिकार्ये सहयोगं कृतवतः प्रियंवदाम्बाकौण्डिन्न्यायनी - सुमोदवर्धनकौण्डिन्न्यायन-सम्मोदवर्धनकौण्डिन्न्यायन-वशंवदाम्बाकौण्डिन्न्यायन्यतिसम्मोदवर्धनकौण्डिन्न्यायनान् प्रति साधुवादान् व्याहरामि। वशंवदाम्बा सर्वाणि चित्राण्यपि अलेखीदिति तस्यै विशेषतः साधुवादान् ददामि। सुसङ्गमकयोजनकार्ये क्रियमाणे भूयोभूयो वर्णपदवाक्यपरिवर्तनयुतमस्माभिः कृतं कष्टदायि संशोधनमपि संस्कृतभाषा-प्रचारं प्रति सद्भावनया प्रसन्नतयैव कृतवन्तं श्रीमन्तं विनोदघिमिरेमहाभागं प्रति च साधुवादान् व्याहराम्यहम्-

प्रमोदवर्धनः कौण्डिन्न्यायनः
स्वाद्ध्यायशालाकुटुम्बगृह्यः

CC-0. In Public Domain. Digitization by eGangotri

स्तोत्राणि

ब्रह्मस्तोत्रम्

शुक्लाम्बरं कृष्णमृगाजिनाङ्कितं
सुकूर्चकं विश्वसृजं चतुर्मुखम् ।
कुसुम्भदण्डस्रुवदर्भहस्तकं
सरस्वतीशं कमलासनं भजे ॥

विष्णुस्तोत्रम्

सशङ्खचक्रं सकिरीटकुण्डलं
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्स्थलकौस्तुभश्रियं
नमामि विष्णुं शिरसा चतुर्भुजम् ॥

रुद्रस्तोत्रम्

कर्पूरगौरं करुणावतारं
संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे
भवं भवानीसहितं नमामि ॥

CC-0. In Public Domain. Digitization by eGangotri

गणेशस्तोत्रम्

वन्दे वन्दारुमन्दारमिन्दुभूषणनन्दनम् ।
अमन्दानन्दसन्दोहबन्धुरं सिन्धुराननम् ॥

सरस्वतीस्तोत्रम्

शुक्लां ब्रह्मविचारसारपरमा-
माद्यां जगद्व्यापिनीम्
वीणापुस्तकधारिणीमभयदां
जाड्यान्धकारापहाम् ।
हस्ते स्फाटिकमालिकां विदधतीं
पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं
बुद्धिप्रदां शारदाम् ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथमः पाठः

प्रथमाया: विभक्ते: प्रयोग:



घोटकः धावति।



कुक्कुटौ वाश्येते।



कुक्कुराः बुक्कन्ति।



सूर्यः उदेति।

विमानम् उड्डयते।



पुत्तलिकाः उड्डयन्ते।

मयूरः नृत्यति।

बालिका हसति।

कविः लिखति।

अग्निः ज्वलति।



अग्नी ज्वलतः।



सर्वे अग्नयः ज्वलन्ति।

नदी वहति।

नद्यौ वहतः।

नद्यः वहन्ति।

CC-0. In Public Domain. Digitization by eGangotri

पितामही उपविशति।



मधुकर्यौ उड्डयेते।

नर्तक्यः नृत्यन्ति।



पशुः उत्तिष्ठति।

पशू उत्तिष्ठतः।



सर्वे पशवः उत्तिष्ठन्ति।

शिशुः शेते।



भ्राता खेलति।



गौः तिष्ठति।

त्वं रोदिषि।

युवां खेलथः।

यूयं हसथ।

अहं लिखामि।

आवां पठावः।



वयं हिण्डामहे।

CC-0. In Public Domain. Digitization by eGangotri

१. घोटकः किं कुरुते ? घोटकः धावति ।

२. कुक्कुराः किं कुर्वते ?

३. पुत्तलिकाः किं कुर्वते ?

४. अग्निः किं कुरुते ?

५. नदी किं कुरुते ? नदी वहति ।

६. शिशुः किं कुरुते ?

७. पितामही किं कुरुते ?

८. भ्राता किं कुरुते ?

९. आवां किं कुर्वहे ? युवां खेलथः ।

१०. यूयं किं कुरुध्वे ? वयं हिण्डामहे ।

(एवमेव शिक्षकैरन्येऽपि प्रश्नाः प्रष्टव्याः, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयितव्यानि -

अग्रजः	
बालकः	
बालिका	खेलति
भ्राता	खेलसि
बालिके	खेलामि
बालकाः	खेलतः
बालकौ	खेलथः
त्वम्	खेलावः
यूयम्	खेलन्ति
युवाम्	खेलथ
अहम्	खेलामः
आवाम्	
वयम्	

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः

द्वितीयायाः विभक्तेः प्रयोगः



बिडालः मूषकं खादति।



सारसः मत्स्यं खादति।

रामः नखान् निकृन्तति।

शिक्षकः सर्वान् छात्रान् पाठयति।



छात्रः घटिकां पश्यति।

माया पादुके प्रतिमुञ्चते।

अम्बा अग्निं ज्वालयति।



छात्राः गुरुं पृच्छन्ति।

बालिका विपणीं गच्छति।



प्रेक्षकाः नर्तकीः प्रेक्षन्ते।

CC-0. In Public Domain. Digitization by eGangotri



अम्बा त्वां विह्वयते।

पथिकः अस्मान् पश्यति।

१. बिडालः किं खादति ? बिडालः मूषकं खादति ।

२. सारसः किं खादति ?

३. रामः किं कृन्तति ?

४. कः कान् पाठयति ?

५. छात्रः किं पश्यति ?

६. अम्बा किं ज्वालयति ?

७. छात्राः कं पृच्छन्ति ?

८. अम्बा कं विह्वयते ? अम्बा त्वां विह्वयते ।

(एवमेव शिक्षकैरन्येऽपि प्रश्नाः प्रष्टव्याः, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयितव्यानि -

	त्वाम्	विह्वयते
अम्बा	माम्	विह्वयन्ते
पितामही	आवाम्	पश्यति
भगिनी	युवाम्	पश्यन्ति
भ्राता	अस्मान्	पाठयति
पिता	युष्मान्	पाठयन्ति
शिक्षकः	छात्रान्	गच्छति
शिक्षकाः	नर्तकीः	गच्छन्ति
प्रेक्षकाः	विपणीम्	वहतः
पथिकाः	हलम्	कर्षतः
घोटकौ	रथम्	प्रेक्षन्ते
ऋषभौ	शकटम्	

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः

तृतीयायाः विभक्तेः प्रयोगः



बालकः कलमेन लिखति।

कृषाणः कुद्दालेन वाटीं खनति।

मनुष्यः पादाभ्यां हिण्डते।

मनुष्याः नेत्राभ्यां पश्यन्ति।

पथिकः अञ्जलिना जलं पिबति।

मृगाः मुनिभिः सह उपविशन्ति।

सौचिकः सूच्या वस्त्रं सीव्यति।

बालिका सम्मार्जन्या अवकरम् अवहरति।

अग्रजः भगिनीभ्यां सह खेलति।



पशुः पशुना सह चरति।

CC-0. In Public Domain. Digitization by eGangotri

राम: युष्माभि: सह खेलति।

हरि: अस्माभि: सह पठति।

१. बालक: केन लिखति ? बालक: कलमेन लिखति ।

२. कृषक: केन वाटीं खनति ?

३. मनुष्य: केन हिण्डते ?

४. मनुष्या: केन पश्यन्ति ?

५. पथिक: केन जलं पिबति ? पथिक: अञ्जलिना जलं पिवति ।

६. मृगा: कै: सह उपविशन्ति ?

७. सौचिक: केन वस्त्रं सीव्यति ?

८. बालिका केन अवकरम् अवहरति ?

९. राम: केन सह खेलति ?

१०. हरि: केन सह पठति ? हरि: अस्माभि: सह पठति ।

(एवमेव शिक्षकैरन्येऽपि प्रश्ना: प्रष्टव्या:, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयितव्यानि -

<table>
<tr><td>शिक्षका:
शिक्षिका
छात्रा:
त्वम्</td><td>खटिकया
कलमेन</td><td colspan="2">लिखति
लिखसि
लिखन्ति</td></tr>
<tr><td>बालक:
बालिका:
त्वम्
अहम्</td><td>बालिकाभि:
त्वया
युवाभ्याम्
युष्माभि:
बालकै:
मया
आवाभ्याम्
अस्माभि:</td><td>सह</td><td>खेलति
खेलन्ति
खेलसि
खेलामि
उपविशति
उपविशसि
उपविशामि
उपविशन्ति</td></tr>
</table>

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थ्याः विभक्तेः प्रयोगः

नमो वागीश्वराय।

सरस्वत्यै नमः।



गणेशाय नमः।

ऋषिभ्यो नमः।

गुरवे नमः।



अग्नये स्वाहा।



गोपालः पशवे घासं ददाति।

गोपालः पशुभ्यां पलालं ददाति।

गोपालः पशुभ्यः कौण्डकं ददाति।

गृहिण्यः भिक्षवे भिक्षां ददति।

राजा कवये धनं ददाति।

भ्राता भगिन्यै पुस्तकं ददाति।

CC-0. In Public Domain. Digitization by eGangotri

पिता तुभ्यम् उपानहौ ददाति।



भ्राता मह्यं छत्रं ददाति।

१. गोपाल: कस्मै घासं ददाति ? गोपाल: पशवे घासं ददाति ।

२. गृहिण्य: कस्मै भिक्षां ददति ?

३. राजा कस्मै धनं ददाति ?

४. भ्राता कस्मै किं ददाति ?

५. पिता कस्मै उपानहौ ददाति ?

(एवमेव शिक्षकैरन्येऽपि प्रश्ना: प्रष्टव्या:, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथासंभवमधिकानि वाक्यानि रचयितव्यानि -

माता पिता भ्राता प्रधानाध्यापक: राजा गोपाल: त्वम् अहम् गृहिण्य:	पुत्राय पुत्रीभ्याम् पुत्र्यै कविभ्य: कवये युष्मभ्यम् तुभ्यम् युवाभ्याम् आवाभ्याम् भिक्षवे पशुभ्याम् पशुभ्य: मह्यम् अस्मभ्यम्	पारितोषिकम् पुस्तकम् कलमानि कदलीफलम् भक्तम् दुग्धम् धनम् पलालम् घासम् भिक्षाम्	ददाति ददति ददासि ददामि
इन्द्राय देव्यै गुरुभ्य:		नम: स्वाहा	

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः

पञ्चम्याः विभक्तेः प्रयोगः



हस्ती सिंहात् बिभेति।



वानरः कुक्कुरात् बिभेति।



हरिणाः चित्रकात् बिभ्यति।



शृगालाः व्याघ्रात् बिभ्यति।



चित्रकपोतः श्येनात् बिभेति।



सर्पः नकुलात् बिभेति।

बालकः कर्कटकात् बिभेति।

बालिका गण्डूपदात् बिभेति।

गृहं मुनष्यं वर्षात् रक्षति।



पक्वम् आम्रं वृक्षात् पतति।

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्रात् पिता आगच्छति।

माता वनात् आगच्छति।



सूर्यात् प्रकाशः आगच्छति।

तप्तात् पानीयात् बाष्पः आगच्छति।



अग्नेः धूमः उद्गच्छति।

बालिका धारायाः जलम् आनयति।

भगिनी पुष्पवाट्याः पुष्पाणि आनयति।

बालकः मधुकरीभ्यः बिभेति।



मुनेः मृगाः न बिभ्यति।



त्वं वन्यात् पशोः बिभेषि।

CC-0. In Public Domain. Digitization by eGangotri



शृगाल: मत् बिभेति ।

वन्या: पशव: अस्मत् बिभ्यति ।

१. हस्ती कस्मात् बिभेति ? हस्ती सिंहात् बिभेति ।

२. सर्प: कस्मात् बिभेति ?

३. गृहं मुनष्यं कस्मात् रक्षति ?

४. कस्मात् प्रकाश: आगच्छति ?

५. कस्मात् धूम: उद्गच्छति ?

६. बालिका कुत: जलम् आनयति ?

७. भगिनी कुत: पुष्पाणि आनयति ?

८. वन्या: पशव: कुत: बिभ्यति ?

(एवमेव शिक्षकैरन्येऽपि प्रश्ना: प्रष्टव्या:, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयितव्यानि -

गृहिण्य: मूषक: बिडाल: वानरा: कुक्कुर: व्याघ्र: शृगाला: पशव:	बालकात् सिंहात् बालिकाया: भगिन्या: बिडालात् कुक्कुरात् व्याघ्रात् अग्ने: त्वत् युवाभ्याम् युष्मत् मत् आवाभ्याम् अस्मत्	बिभेति न बिभेति बिभ्यति न बिभ्यति

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः पाठः

षष्ठ्याः विभक्तेः प्रयोगः



बालकस्य गृहमस्ति।



विमानस्य पक्षौ स्तः।



गण्डकस्य खड्गकः भवति।

बालिकायाः पादुके स्तः।



बालिकायाः चूडिकाः सन्ति।

मुनेः कुटी अस्ति।

कवेः लेखनी अस्ति।



अग्नेः ज्वाला रक्ता भवति।



पशोः पुच्छं भवति।



गुरोः गृहम् अस्ति।

CC-0. In Public Domain. Digitization by eGangotri



नद्याः तीरे वृक्षाः सन्ति।



पुष्करिण्याः समीपे उद्यानम् अस्ति।



कुक्कुट्याः समीपे शावकाः सन्ति।



कर्कट्याः अषाडवरागः भवति।



कण्टकिफलस्य व्यञ्जनं भवति।



मूलकस्य व्यञ्जनं भवति।

स्वर्णस्य कुण्डले भवतः।



काष्ठस्य खट्वा भवति।



सर्पस्य विषं भवति।



अस्माकं विद्यालयः अस्ति।

CC-0. In Public Domain. Digitization by eGangotri

१. **कस्य गृहम् अस्ति ? बालकस्य गृहम् अस्ति ।**
२. **कस्य पक्षौ स्तः ?**
३. **कस्याः चूडिकाः सन्ति ?**
४. **कस्य कुटी अस्ति ?** मुनेः कुटी अस्ति ।
५. **कस्य पुच्छं भवति ?**
६. कुत्र वृक्षाः सन्ति ? नद्याः तीरे वृक्षाः सन्ति ।
७. कुत्र उद्यानम् अस्ति ?
८. कस्य अषाडवरागः भवति ?
९. कस्य कुण्डले भवतः ?
१०. कस्य विषं भवति ?
११. कस्य विद्यालयः अस्ति ? अस्माकं विद्यालयः अस्ति ।

(एवमेव शिक्षकैरन्येऽपि प्रश्नाः प्रष्टव्याः, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयितव्यानि -

बालकस्य बालिकायाः मुनेः कवेः गुरोः पशोः स्वर्णस्य मनुष्यस्य कृषाणस्य तव मम	कुटी गृहम् लेखनी शृङ्गे पुच्छम् कुण्डले हस्तौ पादौ नेत्रे कर्णौ मुखम् क्षेत्रम् कुद्दालः हलम्	अस्ति भवति स्तः भवतः

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः पाठः

मनुष्याः गृहे निवसन्ति।



मत्स्याः जले निवसन्ति।

कण्टकिफलं वृक्षे फलति।



कर्कटीफलं लतायां फलति।



मनुष्यः खट्वायां शेते।



सिंहः गुहायां शेते।



वने कृष्णसारः भवति।

वने भल्लूकः भवति।

वने शुकाः सारिकाः च भवन्ति।



हिमालयप्रदेशे मेषाः भवन्ति।

CC-0. In Public Domain. Digitization by eGangotri



मर्कटक: जाले अवतिष्ठते।

श्येना: चिल्ला: च आकाशे उपरि उड्डयन्ते।



कच्छपा: जले स्थले च निवसन्ति।



समुद्रे ग्राहा: भवन्ति।

वर्षासु मयूर: नृत्यति।

वर्षासु भेका: रटन्ति।



बालक: अञ्जलौ पानीयं गृह्णाति।

यजमान: अग्नौ चरुं जुहोति।

पुत्तलिका अग्नौ पतति।



गृध्रा: मृते पशौ निपतन्ति।

CC-0. In Public Domain. Digitization by eGangotri



उलूकाः जतुकाः च रात्र्यां विचरन्ति।



हंसाः पुष्करिण्यां प्लवन्ते।

युवकाः नद्यां प्लवन्ते।

वाट्यां चिचिण्डः फलति।

वाट्यां घोषकः फलति।



कृषाणाः वाट्यां राजिकाशाकं रोपयन्ति।



कृषाणाः वाट्यां मूलकानि रोपयन्ति।



भ्राता त्वयि स्नेहं कुरुते।

मातापितरौ आवयोः स्नेहं कुर्वाते।



शिक्षकाः अस्मासु स्नेहं कुर्वते।

CC-0. In Public Domain. Digitization by eGangotri

१. मनुष्याः कुत्र निवसन्ति ? मनुष्याः गृहे निवसन्ति ।
२. सिंहः कुत्र शेते ?
३. कृष्णसारः कुत्र भवति ?
४. कच्छपाः कुत्र निवसन्ति ?
५. मयूरः कदा नृत्यति ?
६. गृध्राः कुत्र निपतन्ति ?
७. हंसाः कुत्र प्लवन्ते ?

(एवमेव शिक्षकैरन्येऽपि प्रश्नाः प्रष्टव्याः, उत्तराणि च प्राप्तव्यानि)

अधोलिखितानि पदानि प्रयुज्य यथासंभवमधिकानि वाक्यानि रचयितव्यानि -

(क)

वने पुष्करिण्याम् पुष्पेषु वाट्याम् मासेषु ऋतुषु वर्षेषु	भल्लूकः शृगालाः व्याघ्रः मृगाः कमलानि मत्स्याः कच्छपाः भ्रमराः घोषकः चिचिण्डः पक्षौ मासौ अयने	भवति भवतः भवन्ति तिष्ठन्ति विकसन्ति फलति

(ख)

हंसाः युवकाः यजमानः शलभाः	पुष्करिण्याम् नद्याम् अग्नौ	प्लवन्ते चरुं जुहोति पतन्ति	
पिता मातापितरौ गुरवः सख्यः	त्वयि मयि आवयोः अस्मासु पुत्रे	स्नेहं	कुरुते कुर्वाते कुर्वते

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पाठः

सम्बोधन-विभक्तेः प्रयोगः



पुत्र, गृहकार्यं कुरुष्व।



बालक, गणितं कुरुष्व।



बालक, आसनात् उत्तिष्ठ।



बालक, आसने उपविश।



बालकौ, कलहं न कुर्वाथाम्।



बालकाः, अङ्‌गने खेलत।

बालकाः, कलकलं न कुरुध्वम्।

बालिके, दुग्धं पिब।

बालिके, पानीयं पिबतम्।

बालिकाः, विद्यालयं गच्छत।

CC-0. In Public Domain. Digitization by eGangotri

अग्ने, अस्मान् रक्ष।

कवे, एकं स्वरचितं श्लोकं श्रावय।

भगिनि, पुस्तकम् आनय।

भगिन्यौ, मया सह खेलतम्।

पितामहि, मह्यं भक्तं देहि।



गुरो, मम अभ्यासपुस्तिकां मह्यं देहि।

अधोलिखितानि वाक्यानि शुद्धानि कुरुध्वम्-

(क) बालकः, गृहकार्यं कुरुष्व ।

(ख) बालका, कलकलं न कुरुध्वम् ।

(ग) बालिका, जलं पिब ।

(घ) अग्नि, अस्मान् रक्ष ।

(ङ) भगिनी, पुस्तकम् आनय ।

(च) गुरु, मह्यं पुस्तिकां देहि ।

(छात्रान् एतं पाठं पाठयित्वा यथासंभवमेतदनुसारं क्रियाकलापः कारयितव्यः)

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः

दीर्घसन्धिः

अद्य मम गृहे कर्म अस्ति ।	अद्य मम गृहे कर्मास्ति ।
एतत् पुस्तकं मम अस्ति ।	एतत् पुस्तकं ममास्ति ।
अदः पुस्तकं तव अस्ति ।	अदः पुस्तकं तवास्ति ।
मम भ्राता अस्ति ।	मम भ्रातास्ति ।
तव पिता अस्ति ।	तव पितास्ति ।
विद्यालयात् बालिका आगच्छति ।	विद्यालयात् बालिकागच्छति ।
नगरात् पिता आगच्छति ।	नगरात् पितागच्छति ।
कूपात् महिला आगमत् ।	कूपात् महिलागमत् ।
भल्लूकं दृष्ट्वा बालिका चकिता अस्ति ।	भल्लूकं दृष्ट्वा बालिका चकितास्ति ।
बालकः दधि ईक्षते ।	बालकः दधीक्षते ।
मम भगिनी इतः आगच्छति ।	मम भगिनीतः आगच्छति ।
मम भगिनी ईक्षणं कुरुते ।	मम भगिनीक्षणं कुरुते ।
हंसः साधु उड्डयते ।	हंसः साधूड्डयते ।
चिल्लः अपि साधु उड्डयते ।	चिल्लः अपि साधूड्डयते ।
वत्स, कुरु उपकारम् ।	वत्स, कुरूपकारम् ।
बालक, कुरु उपवासम् ।	बालक, कुरूपवासम् ।
एतत् लघु ऊर्णापिण्डम् अस्ति ।	एतत् लघूर्णापिण्डम् अस्ति ।
अदः गुरु ऊर्णापिण्डम् अस्ति ।	अदः गुरूर्णापिण्डम् अस्ति ।

अधोलिखितेषु वाक्येषु सन्धिजं विकारं प्रयुज्य प्रदर्शयत –

(क) अद्य मम विद्यालये कर्म अस्ति ।
(ख) एतत् फलं तव अस्ति ।
(ग) अदः पुस्तकं मम अस्ति ।
(घ) अदः द्विचक्रिकयानं कस्य अस्ति ?
(ङ) मम माता अस्ति ।
(च) तव पिता अस्ति ।
(छ) बालिका आगमत् ।
(ज) भ्राता अगमत् ।
(झ) त्वं दधि इच्छसि ?
(ञ) अहं दधि इच्छामि ।
(ट) भगिनी ईक्षणं कुरुते ।
(ठ) पितामही ईक्षणं न कुरुते ।
(ड) बालकः साधु उत्तिष्ठति ।
(ढ) कुरु उपकारम् ।
(ण) लघु ऊर्णापिण्डं क्रीणीष्व ।
(त) गुरु ऊर्णापिण्डं नैव क्रीणीष्व ।

CC-0. In Public Domain. Digitization by eGangotri

दशमः पाठः

वर्तमाने लटः प्रयोगः

शिशवः शेरते। नर्तक्यः नृत्यन्ति। त्वं धावसि। यूयं हसथ। वयं खेलामः। माता रमेशं विह्वयते। अग्रजः त्वां विह्वयते। मित्राणि आवां विह्वयन्ते। माता फलानि क्रीणाति। छात्रौ पुस्तिकाः क्रीणीतः। बालिकाः मिष्टखादिकां क्रीणन्ति। अहं विद्यालयं गच्छामि। त्वम् अपि विद्यालयं गच्छसि। मम भगिनी विद्यालयं गच्छति। वयं सर्वे विद्यालयं गच्छामः। कृषाणाः दोरकेण भारं बध्नन्ति। माया सखीभिः सह संलपति। पथिकाः अञ्जलिना पानीयं पिबन्ति। माता पुत्राय भक्तं ददाति। माता पुत्राय दधि ददाति। पिता पुत्र्यै लेखनीं ददाति। अग्रजौ भगिनीभ्यः आम्रं दत्तः। श्रद्धालुः ब्राह्मणाय दानं दत्ते। दयालवः दीनेभ्यः वस्त्राणि ददते। शिक्षकः तुभ्यं पारितोषिकं ददाति। महिष्यः अस्मभ्यं दुग्धं ददति। सर्पः गरुडात् बिभेति। मृगाः सिंहात् बिभ्यति। त्वं कर्कटकात् बिभेषि। अहं सर्पात् बिभेमि। यूयं शृगालात् न बिभीथ। यूयं व्याघ्रात् बिभिथ। वयं भल्लूकात् न बिभिमः। वयं सिंहात् बिभीमः। हिमालयात् शीतः वातः आगच्छति। हिमालयात् बह्व्यः नद्यः प्रभवन्ति। पिता पण्यशालायाः लवणम् आनयति। पिता पण्यशालायाः शर्कराम् आनयति। पिता पण्यशालायाः तैलम् आनयति। पिता पण्यशालायाः वस्त्राणि आनयति। पिता पण्यशालायाः बहूनि वस्तूनि आनयति। कृषाणः वाट्याः घोषकान् आनयति। कृषाणः वाट्याः मूलकानि आनयति। बालकस्य गृहम् अस्ति। विमानस्य पक्षौ स्तः। चटकस्य पक्षौ स्तः। बालिकायाः पुस्तकानि सन्ति। ऋषभस्य गलकम्बलः अस्ति। घोषकस्य व्यञ्जनं भवति। कण्टकिफलस्य व्यञ्जनं भवति। मूलकानाम् अषाडवरागः भवति। पर्वते झरणकाः सन्ति। आकाशे तारकाः सन्ति। भ्राता अङ्गने खेलति। मत्स्याः जले खेलन्ति। बहवः कृषाणाः वाट्यां राजिकाशाकं रोपयन्ति। बहवः कृषाणाः वाट्यां मूलकानि रोपयन्ति।

(एवमेव परिशिष्टे दत्तानां धातूनां लटः सर्वाणि रूपाणि प्रयुज्य वाक्यानां रचने यथासम्भवं यथारुचि च छात्रैः अभ्यासः कारयितव्यः, तदर्थं दिक्प्रदर्शनरूपेण प्रथमं शिक्षकेण विविधाः वाक्यरचनाः कृत्वा प्रदर्शनीयाः)

अधोलिखितानि वाक्यानि लट्लकारान्तैः पदैः पूरयत-

(क) घोटकाः .... ।
(ख) फुल्लानि .... ।
(ग) युवां विद्यालयं .... ।
(घ) वयं विद्यालयं .... ।
(ङ) बालिका सखीभिः सह ... ।
(च) माता पुत्राय फलं .... ।
(छ) त्वं व्याघ्रात् .... ।
(ज) बालिकायाः काचवलयाः .... ।
(झ) मम भ्राता .... ।
(ञ) कृषाणः वाट्यां राजिकाशाकं .... ।

CC-0. In Public Domain. Digitization by eGangotri

एकादशः पाठः

भूते लुङ्-लङ्-लिटां प्रयोगः

बालकः अद्य भक्तम् अखादीत् ।	बालकः ह्यः रोटिकाम् अखादत् ।	मयि बहिर्गते बालकः मम रोटिकां चखाद ।
त्वं भक्तम् अखादीः ?	त्वं ह्यः किम् अखादः ?	मयि सुप्ते त्वं मम कदलीफलं चखादिथ ।
अहम् अद्य सेविकम् अखादिषम् ।	अहं ह्यः आम्रम् अखादम् ।	निद्रितः अहम् अम्बया खादितं भक्तं चखाद ।
माया अद्य संस्कृतम् अपठीत् ।	माया ह्यः इतिहासम् अपठत् ।	मयि बहिर् गते माया मम निबन्धपुस्तकं पपाठ ।
अद्य पानीयम् अपप्तत् ।	ह्यः अपि पानीयम् अपतत् ।	अद्य रात्र्याम् अपि पानीयं पपात ।
रमेशः अद्य विपणीमगमत् ।	रमेशः ह्यः विद्यालयम् अगच्छत् ।	रमेशः माम् अपृष्ट्वा तिर्यक्सङ्ग्रहालयं जगाम ।
रामः अद्य वाट्यां सर्पम् अद्राक्षीत् ।	रामः ह्यः वाटे नकुलम् अपश्यत् ।	रामः एकल एव उद्याने भ्रमन् दिवसे सर्पं ददर्श ।
मम भ्राता अद्य दिवा न अशयिष्ट ।	मम भ्राता ह्यः नवीनायां शय्यायाम् अशेत ।	मयि मामालयं गते मम भ्राता मम शय्यायां शिश्ये ।
मम भगिनी बिडालात् कर्हि अपि न अभैषीत् ।	मम भगिनी ह्यः वने शृगालात् अपि न अबिभेत् ।	अद्य एकला भ्रमन्ती मम भगिनी नकुलात् अपि बिभाय ।
अद्य हरितालिकायां बालिकाः मन्दिरे अनर्तिषुः ।	ह्यः बालिकाः विद्यालये वार्षिकोत्सवे अनृत्यन् ।	दिव्या बालिकाः देव्या महिषासुरे हते ननृतुः किल ।
मम अग्रजः अद्य मां गणितस्य प्रश्नान् अप्राक्षीत् ।	गुरुः ह्यः अस्मान् कठिनान् प्रश्नान् अपृच्छत् ।	मयि अनुपस्थिते गुरुः कमपि प्रश्नं न पप्रच्छ ।
कर्मकराः अद्य प्रभूतं कार्यम् अकार्षुः ।	कर्मकराः ह्यः स्वल्पमेव कार्यम् अकुर्वन् ।	कर्मकराः मयि अनुपस्थिते किमपि कार्यं न चक्रुः ।
अद्य पिता रम्यरूपाणि वस्त्राणि अक्रैषीत् ।	ह्यः माता मिष्टानि फलानि अक्रीणात् ।	मयि विद्यालयं गते अग्रजः गेन्दुकं चिक्राय ।

(एतस्य पाठस्य वाक्येषु प्रयुक्तानां क्रियापदानां वैशिष्ट्यानि छात्राः बोधयितव्याः ।)

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः पाठः

भविष्यति लृट्-लुटोः प्रयोगः

रामः फलानि खादिष्यति ।	रामः श्वः मिष्टान्नं खादिता ।
त्वं किं खादिष्यसि ?	त्वं श्वः किं खादितासि ?
अहं रोटिकाः खादिष्यामि ।	अहं श्वः क्षैरेयं खादितास्मि ।
वयं संस्कृतं पठिष्यामः ।	वयं श्वः इतिहासं पठितास्मः ।
अद्य सायङ्काले पानीयं पतिष्यति ।	श्वः पानीयमवश्यं पतिता ।
रमा विपणिं गमिष्यति ।	रमा श्वः विराटनगरं गन्ता ।
सायङ्काले पिता क्षेत्रात् आगमिष्यति ।	तवाऽग्रजः श्वः नगरात् आगन्ता ।
अद्य मार्गे त्वं मृतं सर्पं द्रक्ष्यसि ।	त्वं श्वः नगरात् आगतम् अग्रजं द्रष्टासि ।
यूयम् अद्य भूम्यामेव शयिष्यध्वे ।	यूयं श्वः नवीनायां शय्यायां शयिताध्वे ।
अद्य मां शान्तं दृष्ट्वा शत्रवः न भेष्यन्ति ।	श्वः युद्धे मां दृष्ट्वा शत्रवः भेतारः ।
अद्य गुरुः अस्मभ्यं गृहकार्यं न दास्यति ।	श्वः गुरुः अस्मभ्यं गृहकार्यं दाता ।
पिता तुभ्यं फलानि दास्यति ।	अग्रजः श्वः मह्यं मिष्टखादिकां दाता ।
अद्य स्वागतकार्यक्रमे नर्तक्यः नर्तिष्यन्ति ।	श्वः पर्वणि नार्यः मन्दिरे नर्तितारः ।
अद्य गुरुः कठिनान् प्रश्नान् प्रक्ष्यति ।	गुरुः श्वः प्रश्नान् न प्रष्टा ।
अद्य त्वं मां न जेष्यसि ।	त्वं श्वः हरिं जेतासि ।

अधोलिखितानि पदानि प्रयुज्य यथाशक्ति अधिकानि वाक्यानि रचयत–

रमेशः रमा बालकाः माया त्वम् अहम् युवाम् आवाम् यूयम् वयम्	(श्वः) (अद्य)	विराटनगरम् व्यासनगरम् मिष्टखादिकाम् रोटिकाः भक्तम् पूपम् फलम् आम्रम्	गमिष्यति गन्ता खादिता खादितासि खादिष्यति खादिष्यन्ति खादितारः खादितास्थः खादिष्यसि खादिष्यथः खादिष्यथ खादिष्यामि खादितास्मि खादिष्यावः खादितास्वः खादितास्मः

(एतस्य पाठस्य वाक्येषु प्रयुक्तानां क्रियापदानां वैशिष्ट्यानि छात्राः बोधयितव्याः)

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशः पाठः

सुशीलः बालकः गृहकार्यं कुरुते।



सुशीलौ बालकौ कलहं न कुर्वाते।

सुशीलाः बालकाः पुष्पविटपान् रोपयन्ति।

सुशीला बालिका सम्मार्जन्या अवकरम् अवहरति।

सुशीले बालिके कूपात् जलम् आनयतः।



सुशीलाः बालिकाः पाठं पठन्ति।



सुशीलं मित्रं प्रतिदिनं स्नाति।



सुशीले मित्रे विद्यालयं गच्छतः।



सुशीलानि मित्राणि मार्गणाय पणान् ददति।

सुन्दरी बालिका मधुरं व्याहरति।

CC-0. In Public Domain. Digitization by eGangotri



हस्ती स्थूल: भवति।
शशक: स्वाणुक: भवति।



माया स्वच्छं लुग्नं लगयति।
राम: मलिनं लुग्नं लगयति।

श्रद्धालु: पुरुष: देवान् पूजयति।



दयालव: पुरुषा: दीनेभ्य: धनं ददति।

१. अधोलिखितानि वाक्यानि शुद्धानि कृत्वाऽभ्यासपुस्तिकायां सारयत–

(क) सुशील: बालकौ कलहं न कुर्वति ।

(ख) सुशीली बालिका पाठं पठति ।

(ग) सुशील: बालिका: कथां शृण्वन्ति ।

(घ) सुन्दर: बालिका मधुरं व्याहरति ।

(ङ) सुशील: मित्रं स्वच्छ: लुग्नं लगयति ।

२. अधोलिखितानि पदानि प्रयुज्य यथासंभवम् अधिकानि वाक्यानि रचयत–

सुशीला		गृहकार्यं कुरुते
चतुरा		न पठति
दु:शीला	बालिका	स्वच्छं लुग्नं लगयति
सुन्दरी	पुत्री	मलिनं लुग्नं लगयति
श्रद्धालु:	बालक:	सर्वान् पीडयति
दयालु:	छात्र:	मधुरं व्याहरति
सुशील:	पुरुष:	प्रतिदिनं स्नाति
चतुर:		दानं ददाति
दु:शील:		परोपकारं कुरुते

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दश: पाठ:

एतद्-इदम्-अदस्-प्रातिपदिकानां प्रयोग:

एष: बालक: हृष्टपुष्ट: अस्ति।

एतौ द्वौ बालकौ कृशौ स्त:।

एते त्रय: बालका: चञ्चला: सन्ति।

एषा बालिका चतुरा अस्ति।

एते द्वे बालिके सुन्दर्यौ स्त:।



एता: तिस्र: बालिका: सुशीला: सन्ति।



एतत् फलं मधुरम् अस्ति।



एते द्वे फले अम्ले स्त:।



एतानि चत्वारि फलानि पक्वानि सन्ति।

अयं बालक: विद्यालयं गच्छति।

CC-0. In Public Domain. Digitization by eGangotri



इमौ द्वौ अश्वौ रथं वहतः।



इमे त्रयः कुक्कुटाः वाश्यन्ते।

इयं बालिका कूपं गच्छति।



इमे द्वे पेटिके भरिते स्तः।



इमाः पञ्च मालाः शोभनाः सन्ति।



इदं वनं घनमस्ति।



इमे द्वे गृहे सदृशे स्तः।



इमानि भाण्डानि पुराणानि सन्ति।



असौ वृक्षः वटः अस्ति।



अमू ऋषभौ धान्यं खादतः।

CC-0. In Public Domain. Digitization by eGangotri

अमी मनुष्याः क्षेत्रे कर्म कुर्वन्ति ।



असौ पुष्पवाटी रमणीया अस्ति ।

असौ नौका इतः आगच्छति ।

अमू महिष्यौ क्षेत्रे चरतः ।

अमूः तारकाः कृत्तिकाः सन्ति ।



अदः पर्वतकूटम् उच्चं वर्तते ।

अमू नक्षत्रे उज्ज्वले स्तः ।

अमूनि कमलानि विकसितानि सन्ति ।

एतस्मै बालकाय जलं देहि ।

एतया बालिकया सह खेल ।

CC-0. In Public Domain. Digitization by eGangotri



एतत् फलं खाद।



अस्मात् कुक्कुरात् न बिभिहि।



अस्याः बालिकायाः झोलिका अस्ति।



अस्य गृहस्य छादने काकः अस्ति।

अमुं वृक्षं परिचिनोषि ?

अमुष्यां नद्यां ग्राहाः सन्ति।

अमुष्मिन् वने सिंहः वर्तते।

अमुष्मिन् क्षेत्रे प्रभूतं धान्यं फलति।

(शिक्षकेण एतद् इदम् अदस् इत्येतेषां प्रातिपदिकानामर्थः परस्परं भेदश्च प्रयोगेणैव बोधयितव्यः)

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः

तत्प्रातिपदिकस्य प्रयोगः

बालकः खेलति।
सः हसति च।

बालिका नृत्यति।
सा गीतम् अपि गायति।



फलं पक्वम् अस्ति।
तत् मधुरम् अस्ति।

धार्मिकः वृक्षं रोपयति।
सः तं सिञ्चति च।



शिक्षकः चपले बालिके विह्वयते।
सः ते उपदिशति च।



रामः आम्रं प्रक्षालयति।
सः तत् खादति च।



रामः बालकैः सह विद्यालयं गच्छति।
सः तैः सह संलपति च।

माया सखीभिः सह भ्रमति।
सा ताभिः सह खेलति च।

रामस्य दश रूप्यकाणि सन्ति।
सः तैः रूप्यकैः पुस्तिकाः क्रीणीते।

CC-0. In Public Domain. Digitization by eGangotri

पिता बालकाय रूप्यकाणि ददाति।
माता तस्मै खाद्यकं ददाति।

पिता बालिकायै झोलिकां ददाति।
माता तस्यै पुस्तकानि ददाति।



आम्रवृक्षात् पत्राणि पतन्ति।
तस्मात् फलानि अपि पतन्ति।



गौः महिष्याः न बिभेति।
मनुष्यः अपि तस्याः न बिभेति।

बालकस्य पुस्तकम् अस्ति।
तस्य कलमम् अपि अस्ति।

बालिकायाः काचवलयाः सन्ति।
तस्याः अङ्गुलीयकमपि अस्ति।



पिता पुत्र्यां स्नेहं कुरुते।
माता अपि तस्यां स्नेहं कुरुते।



सखायः बालके स्नेहं कुर्वते।
शिक्षकाः अपि तस्मिन् स्नेहं कुर्वते।

CC-0. In Public Domain. Digitization by eGangotri

अम्बा कूपात् जलम् आनयति।
भगिनी अपि ततः जलम् आनयति।

युवकाः नद्यां स्नान्ति।
बालकाः अपि तत्र स्नान्ति।

बालकाः विद्यालये पठन्ति।
बालिकाः अपि तत्र पठन्ति।

व्याघ्रः वने निवसति।
मृगाः अपि तत्र निवसन्ति।



कुक्कुरः ग्राम्यः पशुः अस्ति। सः ग्रामे निवसति। सः मनुष्याणाम् उपकारं करोति। तस्य एकं वक्रं पुच्छं भवति। तस्य दंष्ट्राः तीक्ष्णाः भवन्ति। सः चौरेषु आगतेषु बुक्कति। चौराः तस्मात् बिभ्यति। मनुष्याः गृहस्य सुरक्षायै तं पालयन्ति। ते तस्मै खाद्यं च ददति।

अधोनिर्दिष्टानि रिक्तस्थानानि समुचितैः पदैः पूरयत–

१. (क) बालकः भक्तं खादति।
(ख) सः फलानि अपि खादति।

२. (क) बालिका विद्यालयं गच्छति।
(ख) ..... तत्र पठति।

३. (क) अहं विटपं रोपयामि।
(ख) अहं ..... सिञ्चामि।

४. (क) दयालवः मार्गणाय धनं ददति।
(ख) ते..... भक्तम् अपि ददति।

५. (क) महिष्याः शृङ्गे भवतः।
(ख) ..... पुच्छम् अपि भवति।

६. (क) सिंहः वने निवसति।
(ख) व्याघ्रः अपि ..... निवसति।

CC-0. In Public Domain. Digitization by eGangotri

षोडश: पाठ:

क्त्वाप्रत्ययान्तानां प्रयोग:



बालक: पुस्तकं गृह्णाति । बालक: विद्यालयं गच्छति ।

बालक: पुस्तकं गृहीत्वा विद्यालयं गच्छति ।

बालिके भक्तं खादत: । बालिके विद्यालयं गच्छत: ।

बालिके भक्तं खादित्वा विद्यालयं गच्छत: ।



बालका: रामेण सह मिलन्ति । बालका: रामेण सह खेलन्ति ।

बालका: रामेण सह मिलित्वा खेलन्ति ।



माया धारां गमिष्यति । माया जलम् आनेष्यति ।

माया धारां गत्वा जलम् आनेष्यति ।

CC-0. In Public Domain. Digitization by eGangotri



पथिकः फलानि क्रीणीते। पथिकः फलानि खादति।

पथिकः फलानि क्रीत्वा खादति।



हरिः अस्नासीत्। हरिः मन्दिरम् अगमत्।

हरिः स्नात्वा मन्दिरम् अगमत्।

माता लुग्नानि धावति। माता लुग्नानि शुष्कयति।

माता लुग्नानि धावित्वा शुष्कयति।

अधोलिखितेषु वाक्येषु द्वे‌द्वे वाक्ये योजयित्वा एकैकं वाक्यं रचयत–

(क) रामः विपणीं गच्छति । रामः पुस्तकानि क्रीणीते ।
(ख) ब्राह्मणाः स्नान्ति । ब्राह्मणाः सन्ध्योपासनं कुर्वते ।
(ग) माता कूपं गच्छति । माता जलम् आनयति ।
(घ) रमा सखीभिः सह मिलति । रमा उद्यानं गच्छति ।
(ङ) बालकाः फलानि क्रीणन्ति । बालकाः फलानि आनयन्ति ।
(च) कृषाणः कुद्दालं क्रीणीते । कृषाणः तेन वार्टीं खनति ।
(छ) युवां विद्यालये अपठिष्टम् । युवां गृहम् आगमतम् ।
(ज) आवां भक्तं खादिष्यावः । आवां विद्यालयं गमिष्यावः ।
(झ) वयं क्रीडनकानि क्रेष्यामः । वयं क्रीडनकानि आनेष्यामः ।

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशः पाठः

ल्यबन्तानां प्रयोगः

माया सेवं प्रक्षालयति।

माया सेवं खादति।

माया सेवं प्रक्षाल्य खादति।



बालकौ चक्रकट्याम् उपविशतः।

बालकौ भक्तं खादतः।

बालकौ चक्रकट्याम् उपविश्य भक्तं खादतः।



छात्राः गुरुं प्रणमन्ति।



छात्राः पाठं पठन्ति।

छात्राः गुरुं प्रणम्य पाठं पठन्ति।

गोपालः वृक्षम् आरोहति।

गोपालः फलानि भूम्यां पातयति।

गोपालः वृक्षम् आरुह्य फलानि भूम्यां पातयति।

CC-0. In Public Domain. Digitization by eGangotri

अग्रज: नगरात् आगमिष्यति।　　　अग्रज: नगरस्य वृत्तान्तं कथयिष्यति।

अग्रज: नगरात् आगम्य नगरस्य वृत्तान्तं कथयिष्यति।





पिता गृहम् आगमत्।　　　पिता जलम् अपात्।

पिता गृहमागम्य जलमपात्।



व्याध: जालं प्रसारयति।　　　व्याध: पारावतान् समादत्ते।

व्याध: जालं प्रसार्य पारावतान् समादत्ते।

अधोलिखितेषु वाक्येषु द्वेद्वे वाक्ये योजयित्वा एकैकं वाक्यं रचयत–

(क) पिता नगरात् आगमिष्यति। पिता अस्मभ्यं मिष्टखादिकां दास्यति।

(ख) बालिका: मञ्चे उपविशन्ति। बालिका: पाठं पठन्ति।

(ग) कृषक: वृक्षम् आरोहति। कृषक: घासं पातयति।

(घ) सैनिक: अश्वम् आरोहति। सैनिक: देशान्तरं गच्छति।

(ङ) त्वं शिक्षिकां प्रणमसि। त्वं पाठं पठसि।

(च) अहम् अमृतफलं प्रक्षालयामि। अहम् अमृतफलं खादामि।

(छ) वाणिजा: महार्घं विक्रीणते। वाणिजा: धनिका: भवन्ति।

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशः पाठः

तुमुन्प्रत्ययान्तानां प्रयोगः



बालकः विद्यालयं गच्छति ।

बालकः विद्यालये पठति ।

बालकः पठितुं विद्यालयं गच्छति ।



बालिके गृहम् आगच्छतः ।

बालिके खाद्यकं खादतः ।

बालिके खाद्यकं खादितुं गृहम् आगच्छतः ।



मुनयः नदीं गच्छन्ति ।

मुनयः स्नान्ति ।

मुनयः स्नातुं नदीं गच्छन्ति ।

85927
आ8806





पशवः पल्वलं गच्छन्ति ।

पशवः पल्वले पानीयं पिबन्ति ।

पशवः पानीयं पातुं पल्वलं गच्छन्ति ।

दर्ता नं.
15096

CC-0. In Public Domain. Digitization by eGangotri

भगिनी विपणीं गच्छति।

भगिनी फलानि क्रीणाति।

भगिनी फलानि क्रेतुं विपणीं गच्छति।

महिला नदीं गच्छति।

महिला जलम् आनयति।

महिला जलमानेतुं नदीं गच्छति।



बालकाः तिर्यक्सङ्ग्रहालयं गच्छन्ति।

बालकाः सिंहं प्रेक्षन्ते।

बालकाः सिंहं प्रेक्षितुं तिर्यक्सङ्ग्रहालयं गच्छन्ति।

अधोलिखितेषु वाक्येषु द्वेद्वे वाक्ये योजयित्वा एकैकं वाक्यं रचयत–

(क) वानराः उपवनम् आगच्छन्ति। वानराः फलानि खादन्ति।
(ख) बालिकाः विद्यालयं गच्छन्ति। बालिकाः विद्यालये पठन्ति।
(ग) पान्थः कूपम् अगमत्। पान्थः पानीयम् अपात्।
(घ) अग्रजः विपणीं गमिष्यति। अग्रजः पुस्तकानि क्रेष्यति।
(ङ) यूयं तिर्यक्सङ्ग्रहालयं गच्छथ। यूयं व्याघ्रं प्रेक्षध्वे।
(च) ऋषयः नदीं गच्छन्ति। ऋषयः स्नान्ति।
(छ) माता कूपं गच्छति। माता जलम् आनयति।

CC-0. In Public Domain. Digitization by eGangotri

ऊनविंशः पाठः

सङ्ख्याविशेषणानां प्रयोगः



एकादश बालकाः पठन्ति।



एकादश बालिकाः लिखन्ति।

एकादश फलानि पतन्ति।

द्वादश बालकाः खेलन्ति।



द्वादश कुक्कुट्यः चरन्ति।

द्वादश पत्राणि पतन्ति।



त्रयोदश घोटकाः धावन्ति।



त्रयोदश पिपीलिकाः हिण्डन्ते।



त्रयोदश भाण्डानि महानसे सन्ति।

चतुर्दश कुक्कुराः बुक्कन्ति।



चतुर्दश मधुकर्यः उड्डयन्ते।



चतुर्दश तालकानि सन्ति।

पञ्चदश कुक्कुटाः वाश्यन्ते।



एकस्मिन् पक्षे पञ्चदश तिथयः भवन्ति।



पञ्चदश कलमानि एकस्यां पुटिकायां सन्ति।

CC-0. In Public Domain. Digitization by eGangotri



षोडश सैनिकाः
गच्छन्ति।



षोडश मालाः शोभनाः
सन्ति।



षोडश लड्डूकानि
पिशीलके सन्ति।



सप्तदश बिडालाः
तिष्ठन्ति।



सप्तदश रोटिकाः
स्थाले सन्ति।



सप्तदश आम्राणि
करण्डके सन्ति।



अष्टादश हंसाः
पुष्करिण्यां प्लवन्ते।



अष्टादश पुस्तिकाः
खट्विकायां सन्ति।



अष्टादश कदलीफलानि
एकस्मिन् हस्तके सन्ति।

ऊनविंशतिः चटकाः
आकाशे उड्डयन्ते।

ऊनविंशतिः तालिकाः
एकस्मिन् कुण्डलके सन्ति।



ऊनविंशतिः पुस्तकानि
पुस्तकधान्यां सन्ति।

विंशतिः दीपाः
ज्वलन्ति।



विंशतिः लेखन्यः
एकस्यां पुटिकायां सन्ति।



विंशतिः कन्दुकानि
व्यायामशालायां सन्ति।

CC-0. In Public Domain. Digitization by eGangotri

विंशः पाठः

(बालकविता)

प्रातःकालवर्णनम्



प्रातःकाले पाटला दिग् हि पूर्वा
गर्भे बालं सूर्यदेवं च धृत्वा ।
अस्मान् सर्वान् स्वोन्मुखान् कारयन्ती
निद्रां तन्द्रां शोभते वारयन्ती ॥ १ ॥



प्राचीं त्यक्त्वा गच्छति द्यां पतङ्गो
नीडं मुक्त्वा याति भूमिं विहङ्गः ।
पातुं पेयं याति पुष्पं च भृङ्गस्
तिष्ठन् कायं निर्धुनीते तुरङ्गः ॥२ ॥



सर्वे मर्त्या यान्ति कार्याय तूर्णम्
भाति क्षेत्रं कर्मशीलैर् हि पूर्णम् ।
गेहे तिष्ठेत् कोऽपि वृद्धोऽतिजीर्णो
नास्त्युत्साहो मानवानां विशीर्णः ॥ ३ ॥



तापात् सौरादोषबिन्दुर् विलीनः
सूर्याद् भीत्वोलूकपक्षी निलीनः ।
मार्गं प्राप्तो रंहसा चाऽध्वनीनश्
छात्रोऽधीतेऽनुश्रवं गुर्वधीनः ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

हिमालयः



हिमस्य आलयः हिमालयः इति कथ्यते। यः पर्वतः सर्वदा हिमेन आच्छादितः भवति सः पर्वतः हिमालयः उच्यते। हिमालयपर्वतः नेपालदेशस्य उदीच्यां दिशायां वर्तते। हिमालयस्य मनोरवसर्पणम्, मत्स्यपुच्छकम्, अन्नपूर्णाख्यम्, गौरीशङ्करीयम्, व्योमकूटम्, काञ्चनजङ्घम् इत्यादीनि शिखराणि सुप्रसिद्धानि सन्ति। हिमालय एव पार्वतीमहादेवयोः क्रीडाभूमिः इति पुराणेषु वर्णितमस्ति।

हिमालयः अतीव मनोहरः पर्वतः अस्ति। सर्वे जनाः अस्य सौन्दर्यं विलोक्य प्रसन्नाः भवन्ति। कवयः मुग्धाः भूत्वा अस्य अलौकिकीं सुन्दरतां वर्णयन्ति। बहवः जनाः हिमालयस्य शोभां प्रेक्षितुं नेपालदेशम् आगच्छन्ति।

हिमालयात् बह्व्यः नद्यः प्रभवन्ति। तासु महाकाली, कर्णाली (घर्घरा), भेरी, इरावती, गण्डकी, कौशिकी, अरुणा, ताम्रोदरा, मेची च विशेषेण प्रख्याताः सन्ति। ताः सर्वाः अपि हिमालयात् आविर्भूय समुद्रं प्रति गच्छन्ति। तासां नदीनां जलेन नेपालदेशस्य प्रभूतः भूभागः सिक्तः भवति। ततः च नेपालदेशस्य धान्योत्पादनं सम्भवति। तासु नदीषु बहुविधाः मत्स्याः मकराः च निवसन्ति। ताभ्यः नदीभ्यः विद्युतः उत्पादनमपि भवति।

CC-0. In Public Domain. Digitization by eGangotri

हिमालये बहूनि तीर्थानि सन्ति। तेषु तीर्थेषु मध्ये मानससरोवरम् बिन्दुसरोवरम् मुक्तिक्षेत्रम् दुग्धपुष्करिणी नीलकण्ठह्रदः च इति प्रमुखाणि सन्ति । बहवः श्रद्धालवः जनाः प्रतिवर्षं तेषु तीर्थेषु स्नातुं गच्छन्ति ।

हिमालयक्षेत्रे चमर्यः मेषाः हिमभल्लूकाः हिमचित्रकाः कस्तूरीमृगाः च भवन्ति । तत्र जनाः भारं वाहयितुं गर्दभान् अपि पालयन्ति ।

हिमालयस्य महिमा वेदेषु वेदाङ्गेषु स्मृतिषु पुराणेषु च गीतः वर्तते । महाकविः कालिदासः कुमारसंभवमहाकाव्यस्याऽऽदौ हिमालयस्याऽतीव मनोहरं वर्णनं कृतवान् अस्ति । तस्य प्रथमं पद्यमेतत् वर्तते-

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥ इति ।

तललिखितेषु वाक्येषु मध्ये समीचीनानि वाक्यानि अभ्यासपुस्तिकायां सारयत-

१. हिमालयः प्रतीच्यां दिशायां वर्तते ।
२. हिमालयः उदीच्यां दिशायां वर्तते ।
३. स्वल्पाः जनाः हिमालयस्य शोभां प्रेक्षितुम् आगच्छन्ति ।
४. बहवः जनाः हिमालयस्य शोभां प्रेक्षितुम् आगच्छन्ति ।
५. हिमालयात् बह्व्यः नद्यः प्रभवन्ति ।
६. हिमालयात् स्वल्पाः नद्यः प्रभवन्ति ।
७. हिमालये बहूनि तीर्थानि सन्ति ।
८. हिमालये स्वल्पानि तीर्थानि सन्ति ।
९. दयालवः जनाः तीर्थेषु गच्छन्ति ।
१०. श्रद्धालवः जनाः तीर्थेषु गच्छन्ति ।
११. महाकविः कालिदासः हिमालयस्य मनोहरं वर्णनं कृतवान् अस्ति ।

CC-0. In Public Domain. Digitization by eGangotri

हंस-काक-धानुष्कपथिकानां कथा

अस्ति भारतवर्षे चिरकालात् प्रसिद्धा उज्जयिनी नाम नगरी वर्तते । तस्यां नगर्यां बहवः धानुष्काः वीराः निवसन्ति स्म । एकदा कश् चन वीरः कार्यार्थं कुत्र चित् गत्वा उज्जयिनीं प्रत्यावर्तमानः अभूत् । सः च अधिकेन हिण्डनेन परिश्रान्तः मार्गस्य प्रान्ते एकस्य पर्कटिवृक्षस्य मूले छायायां धनुष्काण्डं रक्षित्वा अशयिष्ट । अथ कतिषु चित् क्षणेषु गतेषु सूर्यस्य तलतो लम्बनात् तस्य मुखात् वृक्षस्य छाया अपागमत् । तस्मिन् एव पर्कटिवृक्षे चिरात् कौ चन हंस-काकौ निवसतः स्म । तत्र दयालुः हंसः पथिकस्य मुखं घर्मेण व्याप्तं दृष्ट्वा कस्यां चनाऽधोमुखायां शुष्कायां निष्पत्रायां शाखायाम् उपविश्य पक्षौ प्रसार्य तस्य पथिकस्य मुखे छायामकार्षीत् । ततः सः पथिकः निद्रासुखेन मुखं व्यादात् । अथ परस्य सुखं सोढुम् अशक्नुवन् स्वभावदुर्जनः काकः तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायिष्ट ।



मुखे काकपुरीषे पतिते सः वीरो व्यबुद्ध । ततः सः ऊर्ध्वं व्यलुलोकत् , तं हंसम् अद्राक्षीत् च । ततः अयमेव हंसः मम मुखे पुरीषोत्सर्गं चकार इति विचार्य सः वीरः तं हंसम् काण्डस्य प्रहारेण अमीमरत् । अत एव नीतिविद्यावृद्धाः कथयन्ति-

काकसङ्गाद् हतो हंसो धानुष्केणेति जानता ।
न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्व चित् ॥ इति ।

CC-0. In Public Domain. Digitization by eGangotri

१. कस्यां नगर्यां धानुष्का: वीरा: निवसन्ति स्म ?

२. पथिक: कुत्र अशयिष्ट ?

३. पर्कटिवृक्षे क: निवसति स्म ?

४. हंस: दयालु: अभूत् किं काक: दयालु: अभूत् ?

५. हंस: किं कृत्वा पथिकस्य मुखे छायामकार्षीत् ?

६. काक: किं कृत्वा पलायिष्ट ?

७. धानुष्क: वीर: कम् अमीमरत् ?

८. दुर्जनेन सह स्थातव्यं न वा ?

९. दुर्जनेन सह गन्तव्यं न वा ?

१०. हंस: केन कारणेन हत: अभूत् ?

११. अधोलिखितानि वाक्यानि शुद्धानि कृत्वा सारयत-

(क) उज्जयिनी नगर्यां बहवा: धानुष्का: वीरा: निवसन्ति स्म ।

(ख) वीर: वृक्षस्य छाये धनुष्काण्डं रक्षत्वा अशयिष्ट ।

(ग) पर्कटिवृक्षे हंसकाका: निवसत: स्म ।

(घ) हंस: दयालव: अभूत् ।

(ङ) हंस: पक्षौ-प्रसारयित्वा पथिकस्य मुखे छायाम् अकार्षीत् ।

(च) दुर्जनेन सह क्व चित् अपि न स्थितव्यम् न गमितव्यम् ।

१२. रिक्तस्थानं पूरयत-

(क) एकदा कश् चन वीर: कार्यार्थं कुत्र चित् गत्वा उज्जयिनीं .... अभूत् ।

(ख) परस्य सुखं सोढुम् .... स्वभावदुर्जन: काक: तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायिष्ट ।

(ग) अयमेव हंस: मम मुखे पुरीषोत्सर्गं .... इति .... स वीर: तं हंसं काण्डस्य प्रहारेण अमीमरत् ।

(घ) काकसङ्गाद् हतो .... धानुष्केणेति जानता ।

न स्थातव्यं न गन्तव्यं .... ॥

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशः पाठः

छात्रयोः संवादः

रमेशः- शङ्कर, कुत्र गत्वा आगच्छन् असि ?

शङ्करः- विपणिं गत्वा आगच्छन् अस्मि ।

रमेशः- झोलिकायां किंकिम् आनैषीः ?

शङ्करः- केलकानि, आरुकाणि, आम्राणि च आनैषम् । ह्यः त्वं किन्तु विद्यालयं नैव आगच्छः ?

रमेशः- अहं तु ह्यः तिर्यक्सङ्ग्रहालयमगच्छम् ।

शङ्करः- केन सह अगच्छः ?

रमेशः- अग्रजेन भगिन्या च सह अगच्छम् ।

शङ्करः- तत्र त्वं किंकिम् अपश्यः ?

रमेशः- सिंहं व्याघ्रं भल्लूकं मृगं च अपश्यम् । तत्र एकः लम्बपुच्छः वानरः अपि अभवत् । अहं तस्मै वानराय मकायमपि अददाम् ।

शङ्करः- अन्यान् काँस्कान् पशून् अपश्यः ?

रमेशः- गण्डकमपि अपश्यम् । तस्य नक्रे उपरि एकः खड्गकः अपि भवति । तत्र अहम् वन्यान् पशून् एव न, किन्तु बहून् वन्यान् पक्षिणः अपि अपश्यम् । तत्र मयूराः, तित्तिराः, शुकाः, सारिकाः, सारसाः, क्रौञ्चाः च आसन् । मयूरस्य अतीव सुन्दरं पिच्छम् भवति । तत्र एकः मयूरः एकवारम् अस्माकम् अग्रे एव अनृत्यत् च ।

CC-0. In Public Domain. Digitization by eGangotri

शङ्करः- तत्र त्वं सिंहात् व्याघ्रात् च न अबिभेः ?

रमेशः- नाऽबिभयम्। तत्र सर्वे वन्याः पशवः पक्षिणः च पञ्जरे स्थापयित्वा रक्षिता भवन्ति। तेभ्यः कः अपि मनुष्यः न बिभेति। त्वं कदाऽपि तिर्यक्सङ्ग्रहालयं गतवान् नाऽसि ?

शङ्करः- न, अहं तत्र गतवान् नाऽस्मि।

रमेशः- तर्हि त्वमपि तिर्यक्सङ्ग्रहालयं गच्छ, वन्यान् पशून् पक्षिणः च प्रेक्षस्व।

शङ्करः- भवति, अहमपि कदा चित् तिर्यक्सङ्ग्रहालयं गमिष्यामि, वन्यान् पशून् पक्षिणः च अवश्यमेव प्रेक्षिष्ये। इदानीं गृहं गच्छामि।

रमेशः- भवतु अहमपि गच्छामि। श्वः पुनः मेलितास्वः।

१. शङ्करः कुत्र गत्वा आगच्छन् अभूत् ?

२. शङ्करः विपण्याः किंकिमानैषीत् ?

३. रमेशः ह्यः कुत्र अगच्छत् ?

४. किं शङ्करः अपि रमेशेन सह तिर्यक्सङ्ग्रहालयमगच्छत् ?

५. रमेशः तिर्यक्सङ्ग्रहालये किंकिमपश्यत् ?

६. रमेशः लम्बपुच्छाय वानराय किमददात् ?

७. कुत्र कः अनृत्यत् ?

८. किं रमेशः व्याघ्रात् अबिभेत् ?

९. किं शङ्करः तिर्यक्सङ्ग्रहालयं गतवान् अस्ति ?

१०. शङ्करः तिर्यक्सङ्ग्रहलयं गमिष्यति न वा ?

११. शङ्करः सिंहं प्रेक्षिष्यते न वा ?

१२. रिक्तस्थानानि पूरयत-

(क) तिर्यक्सङ्ग्रहालये सिंहः, व्याघ्रः, ... च भवन्ति।

(ख) तिर्यक्सङ्ग्रहालये मयूराः, ... सारसाः अपि भवन्ति।

(ग) गण्डकस्य एकः .... भवति।

(घ) मयूरस्य .... पिच्छं भवति।

(ङ) तिर्यक्सङ्ग्रहालये सर्पाः, ग्राहाः, कच्छपाः अपि .... ।

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशः पाठः

नीतिपद्यानि

हीयते हि मतिस् तात हीनैस् सह समागमात् ।
समैश् च समतामेति विशिष्टैश् च विशिष्टताम् ॥ १ ॥

यस्स्यकस्स्य प्प्रसूतोऽपि गुणवान् पूज्ज्यते नरः ।
धनुर् वंशविशुद्धोऽपि निर्गुणः किङ् करिष्ष्यति ॥ २ ॥

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३ ॥

षड् दोषाः पुरुषेणेह हातव्व्या भूतिमिच्छता ।
निद्द्रा तन्द्रा भयङ् क्रोध आलस्स्यन् दीर्घसूत्त्रता ॥ ४ ॥

यौवनन् धनसम्पत्तिः प्रभुत्त्वमविवेकिता ।
एकैकमप्प्यनर्थाय किमु यत्त्र चतुष्टयम् ॥ ५ ॥

युक्ताहारविहारस्स्य युक्तचेष्टस्स्य कर्मसु ।
युक्तस्स्वप्नाऽवबोधस्स्य योगो भवति दुःखहा ॥ ६ ॥

अभिवादनशीलस्स्य नित्त्यवृँ वृद्धोपसेविनः ।
चत्त्वारि तस्स्य वर्धन्ते आयुर् विद्द्या यशो बलम् ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

परिशिष्टम्

१. प्रातिपदिकरूपावलिः

१. कवि-प्रातिपदिकस्य पुंलिङ्गस्य रूपाणि-

	एकवचने	*द्विवचने*	*बहुवचने*
प्रथमायाम्-	**कविः** (कवियाः)*	**कवी**	**कवयः**+ (कव्यः, कवियः)
द्वितीयायाम्-	**कविम्**	**कवी**	**कवीन्** (कव्यः, कवियः)
तृतीयायाम्-	**कविना**+ (कविया, कव्या)	**कविभ्याम्**	**कविभिः**
चतुर्थ्याम्-	**कवये** (कव्ये, कविये)	**कविभ्याम्**	**कविभ्यः**
पञ्चम्याम्-	**कवेः** (कव्यः, कवियः)	**कविभ्याम्**	**कविभ्यः**
षष्ठ्याम्-	**कवेः**+ (कव्यः, कवियः)	**कव्योः** (कवियोः)	**कवीनाम्**
सप्तम्याम्-	**कवौ** (कवा, कवी, कवयि)	**कव्योः** (कवियोः)	**कविषु** (कवा)
सम्बोधने-	**कवे** (कविया)	**कवी**	**कवयः** (कव्यः, कवियः) ।

२. नदी-प्रातिपदिकस्य स्त्रीलिङ्गस्य रूपाणि-

प्रथमायाम्-	**नदी**	**नद्यौ** (नद्या, नदी)	**नद्यः** (नदयः, नदीः)
द्वितीयायाम्-	**नदीम्**	**नद्यौ** (नद्या, नदी)	**नदीः** (नद्यः)
तृतीयायाम्-	**नद्या** (नदिया)	**नदीभ्याम्**	**नदीभिः**
चतुर्थ्याम्-	**नद्यै**	**नदीभ्याम्**	**नदीभ्यः**
पञ्चम्याम्-	**नद्याः** (नदियाः)	**नदीभ्याम्**	**नदीभ्यः**
षष्ठ्याम्-	**नद्याः** (नद्यै)	**नद्योः** (नदियोः, नदीभ्याम्)	**नदीनाम्**# (नदीभ्यः)
सप्तम्याम्-	**नद्याम्** (नदियाम् , नदी)	**नद्योः** (नदियोः)	**नदीषु**
सम्बोधने-	**नदि**	**नद्यौ** (नद्या, नदी)	**नद्यः** (नदयः, नदीः) ।

३. पशु-प्रातिपदिकस्य पुंलिङ्गस्य रूपाणि-

प्रथमायाम्-	**पशुः** (पशुया)	**पशू** (पशावा)	**पशवः** (पश्वः, पशुवः)
द्वितीयायाम्-	**पशुम्**	**पशू** (पशावा)	**पशून्** (पश्वः, पशुवः)
तृतीयायाम्-	**पशुना**(पशुया, पशावा, पश्वा)	**पशुभ्याम्**	**पशुभिः**
चतुर्थ्याम्-	**पशवे** (पश्वे, पशुवे)	**पशुभ्याम्**	**पशुभ्यः**
पञ्चम्याम्-	**पशोः** (पश्वः, पशुवः)	**पशुभ्याम्**	**पशुभ्यः**
षष्ठ्याम्-	**पशोः**° (पश्वः, पशुवः)	**पश्वोः** (पशुवोः)	**पशूनाम्**
सप्तम्याम्-	**पशौ** (पशा, पशावि, पश्वि)	**पश्वोः** (पशुवोः)	**पशुषु**
सम्बोधने-	**पशो** (पशुया)	**पशू** (पशावा)	**पशवः** (पश्वः,पशुवः) ।

---

* () एतादृशकोष्ठान्तर्गतानि सूक्ष्मलिपौ मुद्रितानि रूपाणि वेदे एव प्रयुक्तानि सन्ति, एतेषां स्वेच्छया अभ्यासस् त्यागो वा कार्यः ।
() एतादृशकोष्ठान्तर्गतानि स्थूललिपावेव मुद्रितानि रूपाणि विशेषस्थले (अन्वादेशे) एव प्रयुज्यमानानि सन्ति, एतेषामभ्यासः कर्तुमुचितः ।

+ ख्याता नराधिपतयः कविसंश्रयेण राजाश्रयेण च गताः *कवयः* प्रसिद्धिम् ।
राज्ञा समोऽस्ति न *कवेः* परमोपकारी राज्ञो न चाऽस्ति *कविना* सदृशः सहायः ॥ सुभाषितरत्नभाण्डागारे ।

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा । विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ हितोपदेशे १।१९

° अहितहितविचारशून्यबुद्धेः श्रुतसमयैर् बहुभिस् तिरस्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः पुरुषपशोश च *पशोश्* च को विशेषः ॥ हितोपदेशे २।४५

CC-0. In Public Domain. Digitization by eGangotri

४. सर्व-प्रातिपदिकस्य रूपाणि-

पुंलिङ्गे-

	एकवचने	*द्विवचने*	*बहुवचने*
प्रथमायाम्-	सर्वः	सर्वौ (सर्वा)	सर्वे*
द्वितीयायाम्-	सर्वम्	सर्वौ (सर्वा)	सर्वान्
तृतीयायाम्-	सर्वेण	सर्वाभ्याम्	सर्वैः (सर्वेभिः)
चतुर्थ्याम्-	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चम्याम्-	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठ्याम्-	सर्वस्य	सर्वयोः	सर्वेषाम्
सप्तम्याम्-	सर्वस्मिन्	सर्वयोः	सर्वेषु
सम्बोधने-	सर्व	सर्वौ (सर्वा)	सर्वे

स्त्रीलिङ्गे-

प्रथमायाम्-	सर्वा	सर्वे	सर्वाः
द्वितीयायाम्-	सर्वाम्	सर्वे	सर्वाः
तृतीयायाम्-	सर्वया	सर्वाभ्याम्	सर्वाभिः
चतुर्थ्याम्-	सर्वस्यै	सर्वाभ्याम्	सर्वाभ्यः
पञ्चम्याम्-	सर्वस्याः	सर्वाभ्याम्	सर्वाभ्यः
षष्ठ्याम्-	सर्वस्याः (सर्वस्यै)	सर्वयोः (सर्वाभ्याम्)	सर्वासाम्+ (सर्वाभ्यः)
सप्तम्याम्-	सर्वस्याम्	सर्वयोः	सर्वासु
सम्बोधने-	सर्वे	सर्वे	सर्वाः

नपुंसकलिङ्गे-

प्रथमायाम्-	सर्वम्	सर्वे	सर्वाणि (सर्वा)
द्वितीयायाम्-	सर्वम्	सर्वे	सर्वाणि (सर्वा)
तृतीयायाम्-	सर्वेण	सर्वाभ्याम्	सर्वैः (सर्वेभिः)
चतुर्थ्याम्-	सर्वस्मै	सर्वाभ्याम्	सर्वेभ्यः
पञ्चम्याम्-	सर्वस्मात्	सर्वाभ्याम्	सर्वेभ्यः
षष्ठ्याम्-	सर्वस्य	सर्वयोः	सर्वेषाम्#
सप्तम्याम्-	सर्वस्मिन्	सर्वयोः	सर्वेषु
सम्बोधने-	सर्व	सर्वे	सर्वाणि (सर्वा) ।

---

* *सर्वे* भवन्तु सुखिनः *सर्वे* सन्तु निरामयाः । *सर्वे* भद्राणि पश्यन्तु मा कश् चिद दुःखभाग् भवेत् ॥

*सर्वासा*मेव वृत्तीनां वृत्ती राजकुलाश्रया । अधर्मवहुला ह्येषा नित्योद्वेगा च भारत ॥ शान्तिपर्वणि ।

\# *सर्वेषा*मेव शौचानामर्थशौचं परं स्मृतम् । योऽर्थे शुचिः स हि शुचिर न मृद्वारिशुचिः शुचिः ॥ मनुस्मृतौ ५।१०६

CC-0. In Public Domain. Digitization by eGangotri

५. तत्-प्रातिपदिकस्य रूपाणि-

पुंलिङ्गे-

	एकवचने	द्विवचने	बहुवचने
प्रथमायाम्-	सः*	तौ (ता)	ते
द्वितीयायाम्-	तम्	तौ (ता)	तान्
तृतीयायाम्-	तेन	ताभ्याम्	तैः (तेभिः)
चतुर्थ्याम्-	तस्मै	ताभ्याम्	तेभ्यः
पञ्चम्याम्-	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठ्याम्-	तस्य	तयोः	तेषाम्
सप्तम्याम्-	तस्मिन्	तयोः	तेषु

स्त्रीलिङ्गे-

प्रथमायाम्-	सा*	ते	ताः+
द्वितीयायाम्-	ताम्	ते	ताः
तृतीयायाम्-	तया	ताभ्याम्	ताभिः
चतुर्थ्याम्-	तस्यै+	ताभ्याम्	ताभ्यः
पञ्चम्याम्-	तस्याः	ताभ्याम्	ताभ्यः
षष्ठ्याम्-	तस्याः# (तस्यै)	तयोः (ताभ्याम्)	तासाम् (ताभ्यः)
सप्तम्याम्-	तस्याम्	तयोः	तासु

नपुंसकलिङ्गे-

प्रथमायाम्-	तत्*	ते	तानि* (ता)
द्वितीयायाम्-	तत्	ते	तानि (ता)
तृतीयायाम्-	तेन	ताभ्याम्	तैः (तेभिः)
चतुर्थ्याम्-	तस्मै	ताभ्याम्	तेभ्यः
पञ्चम्याम्-	तस्मात्	ताभ्याम्	तेभ्यः
षष्ठ्याम्-	तस्य	तयोः	तेषाम्
सप्तम्याम्-	तस्मिन्	तयोः	तेषु ।

---

* *तानी*न्द्रियाण्यविकलानि *त*देव नाम *सा* बुद्धिरप्रतिहता वचनं *त*देव ।
अर्थोष्मणा विरहितः पुरुषः *स* एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥ हितोपदेशे १।१२९

\+ *ता* इङ्गुदीस्नेहकृतप्रदीपमास्तीर्णमेध्याजिनतल्पमन्तः ।
तस्यै सपर्यानुपदं दिनान्ते निवासहेतोरुटजं वितेरुः ॥ रघुवंशे १४।८१

\# *तस्याः* खुरन्यासपवित्रपांसुरपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥ रघुवंशे २।२

CC-0. In Public Domain. Digitization by eGangotri

६. एतत्-प्रातिपदिकस्य रूपाणि-

पुंलिङ्गे-

	एकवचने	*द्विवचने*	*बहुवचने*
प्रथमायाम्-	एष:#	एतौ (एता)	एते
द्वितीयायाम्-	एतम् (एनम्)	एतौ (एनौ)	एतान् (एनान्)
तृतीयायाम्-	एतेन (एनेन)	एताभ्याम्	एतै: (एतेभि:)
चतुर्थ्याम्-	एतस्मै	एताभ्याम्	एतेभ्य:
पञ्चम्याम्-	एतस्मात्	एताभ्याम्	एतेभ्य:
षष्ठ्याम्-	एतस्य	एतयो: (एनयो:)	एतेषाम्
सप्तम्याम्-	एतस्मिन्	एतयो: (एनयो:)	एतेषु

स्त्रीलिङ्गे-

प्रथमायाम्-	एषा*	एते	एता:+
द्वितीयायाम्-	एताम् (एनाम्)	एते (एने)	एता: (एना:)
तृतीयायाम्-	एतया (एनया)	एताभ्याम्	एताभि:
चतुर्थ्याम्-	एतस्यै	एताभ्याम्	एताभ्य:
पञ्चम्याम्-	एतस्या:	एताभ्याम्	एताभ्य:
षष्ठ्याम्-	एतस्या: (एतस्यै)	एतयो:(एनयो:) (एताभ्याम्)	एतासाम् (एताभ्य:)
सप्तम्याम्-	एतस्याम्	एतयो: (एनयो:)	एतासु

नपुंसकलिङ्गे-

प्रथमायाम्-	एतत्	एते	एतानि° (एता)
द्वितीयायाम्-	एतत् (एनत्)	एते (एने)	एतानि (एनानि) (एता)
तृतीयायाम्-	एतेन (एनेन)	एताभ्याम्	एतै: (एतेभि:)
चतुर्थ्याम्-	एतस्मै	एताभ्याम्	एतेभ्य:
पञ्चम्याम्-	एतस्मात्	एताभ्याम्	एतेभ्य:
षष्ठ्याम्-	एतस्य	एतयो: (एनयो:)	एतेषाम्
सप्तम्याम्-	एतस्मिन्	एतयो: (एनयो:)	एतेषु ।

एष द्विजजने धर्मो गार्हस्थो लोकधारण: । द्विजानां च सतां नित्यं सदै*वैष* प्रवर्तते ॥ अनुशासनपर्वणि १४१।४५

* *एषा* प्रसन्नस्तिमितप्रवाहा सरिद् विदूरान्तरभावतन्वी । मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमे: ॥ रघुवंशे १३।४८

+ *एताश्* चाऽन्याश् च विविधा: शल्यभूता नराधिप: । वृकोदरस्य ता वाच: श्रुत्वा निर्वेदमागमत् ॥ आश्रमवासिपर्वणि ३।११

° तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता । *एतान्*यपि सतां गेहे नोच्छिद्यन्ते कदा चन ॥ हितोपदेशे १।६०

CC-0. In Public Domain. Digitization by eGangotri

७. इदम्-प्रातिपदिकस्य रूपाणि-

पुंलिङ्गे-

	एकवचने	द्विवचने	बहुवचने
प्रथमायाम्-	अयम्#	इमौ (इमा)	इमे
द्वितीयायाम्-	इमम् (एनम्)	इमौ (एनौ)	इमान् (एनान्)
तृतीयायाम्-	अनेन (एनेन)	आभ्याम्	एभिः
चतुर्थ्याम्-	अस्मै	आभ्याम्	एभ्यः
पञ्चम्याम्-	अस्मात्	आभ्याम्	एभ्यः
षष्ठ्याम्-	अस्य	अनयोः (एनयोः)	एषाम्
सप्तम्याम्-	अस्मिन्	अनयोः (एनयोः)	एषु

स्त्रीलिङ्गे-

प्रथमायाम्-	इयम्*	इमे	इमाः
द्वितीयायाम्-	इमाम् (एनाम्)	इमे (एने)	इमाः (एनाः)
तृतीयायाम्-	अनया (एनया)	आभ्याम्	आभिः
चतुर्थ्याम्-	अस्यै	आभ्याम्	आभ्यः
पञ्चम्याम्-	अस्याः	आभ्याम्	आभ्यः
षष्ठ्याम्-	अस्याः (अस्यै)	अनयोः (एनयोः) (आभ्याम्)	आसाम् (आभ्यः)
सप्तम्याम्-	अस्याम्	अनयोः (एनयोः)	आसु

नपुंसकलिङ्गे-

प्रथमायाम्-	इदम्+	इमे	इमानि (इमा)
द्वितीयायाम्-	इदम् (एनत्)	इमे (एने)	इमानि (इमा एनानि एना)
तृतीयायाम्-	अनेन (एनेन)	आभ्याम्	एभिः
चतुर्थ्याम्-	अस्मै	आभ्याम्	एभ्यः
पञ्चम्याम्-	अस्मात्	आभ्याम्	एभ्यः
षष्ठ्याम्-	अस्य	अनयोः (एनयोः)	एषाम्
सप्तम्याम्-	अस्मिन्	अनयोः (एनयोः)	एषु ।

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ हितोपदेशे १।७०

* *इयं* पल्ली भिल्लैरनुचितसमारम्भरसिकैः समन्तादाकीर्णा विषविषमबाणप्रणयिभिः ।
तरोरस्य स्कन्धे गमय समयं कीर निभृतं न वाणी कल्याणी तदिह मुखमुद्रैव शरणम् ॥ सुभाषितरत्नभाण्डागारे ।

\+ इदमाभाति गगने भिन्दानं सततं तमः ।
अमन्दनयनानन्दकरं मण्डलमैन्दवम् ॥ सुभाषितरत्नभाण्डागारे ।

CC-0. In Public Domain. Digitization by eGangotri

८. अदस्-प्रातिपदिकस्य रूपाणि-

पुंलिङ्गे-	*एकवचने*	*द्विवचने*	*बहुवचने*
प्रथमायाम्-	**असौ**#	**अमू**	**अमी**
द्वितीयायाम्-	**अमुम्***	**अमू**	**अमून्**
तृतीयायाम्-	**अमुना**	**अमूभ्याम्**	**अमीभिः**
चतुर्थ्याम्-	**अमुष्मै**	**अमूभ्याम्**	**अमीभ्यः**
पञ्चम्याम्-	**अमुष्मात्**	**अमूभ्याम्**	**अमीभ्यः**
षष्ठ्याम्-	**अमुष्य**	**अमुयोः**	**अमीषाम्**
सप्तम्याम्-	**अमुष्मिन्**	**अमुयोः**	**अमीषु**
सम्बोधने-	**असौ**	**अमू**	**अमी**

स्त्रीलिङ्गे-			
प्रथमायाम्-	**असौ**	**अमू**	**अमूः**°
द्वितीयायाम्-	**अमुम्**	**अमू**	**अमूः**
तृतीयायाम्-	**अमुया**	**अमूभ्याम्**	**अमूभिः**
चतुर्थ्याम्-	**अमुष्यै**	**अमूभ्याम्**	**अमूभ्यः**
पञ्चम्याम्-	**अमुष्याः**	**अमूभ्याम्**	**अमूभ्यः**
षष्ठ्याम्-	**अमुष्याः** (अमुष्यै)	**अमुयोः** (अमूभ्याम्)	**अमूषाम्** (अमूभ्यः)
सप्तम्याम्-	**अमुष्याम्**	**अमुयोः**	**अमूषु**
सम्बोधने-	**असौ**	**अमू**	**अमूः**

नपुंसकलिङ्गे-			
प्रथमायाम्-	**अदः**+	**अमू**	**अमूनि** (अमू)
द्वितीयायाम्-	**अदः**	**अमू**	**अमूनि** (अमू)
तृतीयायाम्-	**अमुना**	**अमूभ्याम्**	**अमीभिः**
चतुर्थ्याम्-	**अमुष्मै**	**अमूभ्याम्**	**अमीभ्यः**
पञ्चम्याम्-	**अमुष्मात्**	**अमूभ्याम्**	**अमीभ्यः**
षष्ठ्याम्-	**अमुष्य**	**अमुयोः**	**अमीषाम्**
सप्तम्याम्-	**अमुष्मिन्**	**अमुयोः**	**अमीषु**
सम्बोधने-	**अदः**	**अमू**	**अमूनि** (अमू)।

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन्। मणिना भूषितः सर्पः कि*मसौ* न भयङ्करः॥ हितोपदेशे १।८९

* *अमुं* पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिस्सृतानां स्कन्दस्य मातुः पयसां रसज्ञः॥ रघुवंशे २।३६

° *अमूर्* विमानान्तरलम्बिनीनां श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम्।
प्रत्युद्व्रजन्तीव खमुत्पतन्त्यो गोदावरीसारसपङ्क्तयस् त्वाम्॥ रघुवंशे १३।३३

+ *अदः* शरण्यं शरभङ्गनाम्नस् तपोवनं पावनमाहिताग्नेः।
चिराय सन्तर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत्॥ रघुवंशे १३।४५

CC-0. In Public Domain. Digitization by eGangotri

२. धातुरूपावलिः

१. 'भू सत्तायाम्' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	भवति[#]	भवतः	भवन्ति
	मध्यमपुरुषे-	भवसि	भवथः	भवथ
	उत्तमपुरुषे-	भवामि	भवावः	भवामः (भवामसि) ।
लुङि-	प्रथमपुरुषे-	अभूत्	अभूताम्[*] (अभूयाम्)	अभूवन्
	मध्यमपुरुषे-	अभूः (अभुवः)	अभूतम्	अभूत (अभूतन)
	उत्तमपुरुषे-	अभूवम् (अभूम्)	अभूव	अभूम ।
लङि-	प्रथमपुरुषे-	अभवत्	अभवताम्	अभवन्
	मध्यमपुरुषे-	अभवः	अभवतम्	अभवत
	उत्तमपुरुषे-	अभवम्	अभवाव	अभवाम ।
लिटि-	प्रथमपुरुषे-	बभूव	बभूवतुः	बभूवुः
	मध्यमपुरुषे-	बभूविथ	बभूवथुः	बभूव
	उत्तमपुरुषे-	बभूव	बभूविव	बभूविम ।
लृटि-	प्रथमपुरुषे-	भविष्यति[+]	भविष्यतः	भविष्यन्ति
	मध्यमपुरुषे-	भविष्यसि	भविष्यथः	भविष्यथ
	उत्तमपुरुषे-	भविष्यामि	भविष्यावः	भविष्यामः (भविष्यामसि) ।
लुटि-	प्रथमपुरुषे-	भविता	भवितारौ	भवितारः
	मध्यमपुरुषे-	भवितासि	भवितास्थः	भवितास्थ
	उत्तमपुरुषे-	भवितास्मि	भवितास्वः	भवितास्मः (भवितास्मसि) ।
लोटि-	प्रथमपुरुषे-	भवतु(भूतु)-भवतात्	भवताम् (भूताम्)	भवन्तु
	मध्यमपुरुषे-	भव(भवा)-भवतात्	भवतम् (भूतम्)	भवत (भवता, भवतन, भवथन)
	उत्तमपुरुषे-	भवानि (भवा)	भवाव	भवाम ।

[#] हविरावर्जितं होतस् त्वया विधिवदग्निषु ।
वृष्टिर् *भवति* सस्यानामवग्रहविशोषिणाम् ॥ रघुवंशे १।६२

[*] जनस्य साकेतनिवासिनस् तौ द्वावप्य*भूताम*भिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ रघुवंशे ५।३१

[+] अवजानासि मां यस्मादतस् ते न *भविष्यति* ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥ रघुवंशे १।७७

CC-0. In Public Domain. Digitization by eGangotri

२. 'खादृ भक्षणे' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	*द्विवचने*	*बहुवचने*
लटि-	प्रथमपुरुषे-	**खादति**[#*]	**खादतः**	**खादन्ति**
	मध्यमपुरुषे-	**खादसि**	**खादथः**	**खादथ**
	उत्तमपुरुषे-	**खादामि**	**खादावः**	**खादामः** (खादामसि) ।
लुङि-	प्रथमपुरुषे-	**अखादीत्**	**अखादिष्टाम्**	**अखादिषुः**
	मध्यमपुरुषे-	**अखादीः**	**अखादिष्टम्**	**अखादिष्ट**
	उत्तमपुरुषे-	**अखादिषम्** (अखादीम्)	**अखादिष्व**	**अखादिष्म** ।
लङि-	प्रथमपुरुषे-	**अखादत्**	**अखादताम्**	**अखादन्**
	मध्यमपुरुषे-	**अखादः**	**अखादतम्**	**अखादत**
	उत्तमपुरुषे-	**अखादम्**	**अखादाव**	**अखादाम** ।
लिटि-	प्रथमपुरुषे-	**चखाद**	**चखादतुः**	**चखादुः**
	मध्यमपुरुषे-	**चखादिथ**	**चखादथुः**	**चखाद**
	उत्तमपुरुषे-	**चखाद**	**चखादिव**	**चखादिम** ।
लृटि-	प्रथमपुरुषे-	**खादिष्यति**	**खादिष्यतः**	**खादिष्यन्ति**
	मध्यमपुरुषे-	**खादिष्यसि**	**खादिष्यथः**	**खादिष्यथ**
	उत्तमपुरुषे-	**खादिष्यामि**	**खादिष्यावः**	**खादिष्यामः** (खादिष्यामसि) ।
लुटि-	प्रथमपुरुषे-	**खादिता**	**खादितारौ**	**खादितारः**
	मध्यमपुरुषे-	**खादितासि**	**खादितास्थः**	**खादितास्थ**
	उत्तमपुरुषे-	**खादितास्मि**	**खादितास्वः**	**खादितास्मः** (खादितास्मसि) ।
लोटि-	प्रथमपुरुषे-	**खादतु-खादतात्**	**खादताम्**	**खादन्तु**
	मध्यमपुरुषे-	**खाद**(खादा)**-खादतात्**	**खादतम्**	**खादत** (खादता, खादतन, खादयन)
	उत्तमपुरुषे-	**खादानि** (खादा)	**खादाव**	**खादाम** ।

यद्यपि धर्मकीर्ति-विमलसरस्वती-रामचन्द्र-भट्टोजिदीक्षित-वरदराजादिभिः पाणिनीयसूत्रक्रमम् उत्सर्गापवाद-क्रमम् अर्थक्रमं चाऽन्याय्यरूपेण परित्यज्य धातुरूपसिद्धिप्रक्रियाप्रदर्शने लकाराणाम् अन्य एव क्रम आश्रितः, स एव च गतानुगतिकैः पण्डितम्मन्यैरन्यैरनुसृतः, तथापि अस्माभिरर्थक्रमानुसारमुत्सर्गापवादक्रमानुसारं पाणिनीयविधिसूत्रक्रमानुसारं च 'लट् लुङ् लङ् लिट् च लृट् लुट् च ततो विध्यादिलिङ् तथा । आशीर्लिङ् लोट् च लेट् लृङ् च लकाराः पाणिनेर् मताः' इति लकारक्रमोऽनुसृतो बोध्यः ।

* प्राक् पादयोः पतति *खादति* पृष्ठमांसं कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं खलस्य चरितं मशकः करोति ॥ हितोपदेशे १।८१

CC-0. In Public Domain. Digitization by eGangotri

३. 'हिडि गत्यनादरयोः' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	*द्विवचने*	*बहुवचने*
लटि-	प्रथमपुरुषे-	हिण्डते	हिण्डेते	हिण्डन्ते
	मध्यमपुरुषे-	हिण्डसे	हिण्डेथे	हिण्डध्वे
	उत्तमपुरुषे-	हिण्डे	हिण्डावहे	हिण्डामहे ।
लुङि-	प्रथमपुरुषे-	अहिण्डिष्ट	अहिण्डिषाताम्	अहिण्डिषत
	मध्यमपुरुषे-	अहिण्डिष्ठाः	अहिण्डिषाथाम्	अहिण्डिढ्वम्-अहिण्डिध्वम्
	उत्तमपुरुषे-	अहिण्डिषि	अहिण्डिष्वहि	अहिण्डिष्महि ।
लङि-	प्रथमपुरुषे-	अहिण्डत#	अहिण्डेताम्	अहिण्डन्त
	मध्यमपुरुषे-	अहिण्डथाः	अहिण्डेथाम्	अहिण्डध्वम्
	उत्तमपुरुषे-	अहिण्डे	अहिण्डावहि	अहिण्डामहि ।
लिटि-	प्रथमपुरुषे-	जिहिण्डे	जिहिण्डाते	जिहिण्डिरे
	मध्यमपुरुषे-	जिहिण्डिषे	जिहिण्डाथे	जिहिण्डिध्वे
	उत्तमपुरुषे-	जिहिण्डे	जिहिण्डिवहे	जिहिण्डिमहे ।
लृटि-	प्रथमपुरुषे-	हिण्डिष्यते	हिण्डिष्येते	हिण्डिष्यन्ते
	मध्यमपुरुषे-	हिण्डिष्यसे	हिण्डिष्येथे	हिण्डिष्यध्वे
	उत्तमपुरुषे-	हिण्डिष्ये	हिण्डिष्यावहे	हिण्डिष्यामहे ।
लुटि-	प्रथमपुरुषे-	हिण्डिता	हिण्डितारौ	हिण्डितारः
	मध्यमपुरुषे-	हिण्डितासे	हिण्डितासाथे	हिण्डिताध्वे
	उत्तमपुरुषे-	हिण्डिताहे	हिण्डितास्वहे	हिण्डितास्महे ।
लोटि-	प्रथमपुरुषे-	हिण्डताम्	हिण्डेताम्	हिण्डन्ताम्
	मध्यमपुरुषे-	हिण्डस्व	हिण्डेथाम्	हिण्डध्वम् (हिण्डध्वात्)
	उत्तमपुरुषे-	हिण्डै	हिण्डावहै	हिण्डामहै ।

अनन् कुमार्गेषु शुभाध्वनैव वन् प्रमन् भृशोत्कण्ठितगोपिके हरौ ।
स पापमुन्भिर् बुधहेड्भिरुन्मदैरनेठितां क्ष्मां पुनरप्य*हिण्डत* ॥ धातुकाव्ये १।३५

CC-0. In Public Domain. Digitization by eGangotri

४. 'पठ व्यक्तायां वाचि' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	पठति#	पठतः	पठन्ति
	मध्यमपुरुषे-	पठसि	पठथः	पठथ
	उत्तमपुरुषे-	पठामि	पठावः	पठामः (पठामसि)।
लुङि-	प्रथमपुरुषे-	अपठीत्	अपठिष्टाम्	अपठिषुः
	मध्यमपुरुषे-	अपठीः	अपठिष्टम्	अपठिष्ट
	उत्तमपुरुषे-	अपठिषम्	अपठिष्व	अपठिष्म ।
पक्षान्तरे-	प्र.-	अपाठीत्	अपाठिष्टाम्	अपाठिषुः
	म.-	अपाठीः	अपाठिष्टम्	अपाठिष्ट
	उ.-	अपाठिषम्	अपाठिष्व	अपाठिष्म ।
लङि-	प्रथमपुरुषे-	अपठत्	अपठताम्	अपठन्
	मध्यमपुरुषे-	अपठः	अपठतम्	अपठत
	उत्तमपुरुषे-	अपठम्	अपठाव	अपठाम ।
लिटि-	प्रथमपुरुषे-	पपाठ	पेठतुः	पेठुः
	मध्यमपुरुषे-	पेठिथ	पेठथुः	पेठ
	उत्तमपुरुषे-	पपाठ-पपठ	पेठिव	पेठिम ।
लृटि-	प्रथमपुरुषे-	पठिष्यति	पठिष्यतः	पठिष्यन्ति
	मध्यमपुरुषे-	पठिष्यसि	पठिष्यथः	पठिष्यथ
	उत्तमपुरुषे-	पठिष्यामि	पठिष्यावः	पठिष्यामः (पठिष्यामसि) ।
लुटि-	प्रथमपुरुषे-	पठिता	पठितारौ	पठितारः
	मध्यमपुरुषे-	पठितासि	पठितास्थः	पठितास्थ
	उत्तमपुरुषे-	पठितास्मि	पठितास्वः	पठितास्मः (पठितास्मसि) ।
लोटि-	प्रथमपुरुषे-	पठतु-पठतात्	पठताम्	पठन्तु
	मध्यमपुरुषे-	पठ(पठा)-पठतात्	पठतम्	पठत
	उत्तमपुरुषे-	पठानि (पठा)	पठाव	पठाम ।

न धर्मशास्त्रं *पठती*ति कारणं न चाऽपि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवाऽत्र सदाऽतिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ हितोपदेशे १।१७

CC-0. In Public Domain. Digitization by eGangotri

५. 'पा पाने' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	पिबति[#] (पिपाति)	पिबतः	पिबन्ति[*]
	मध्यमपुरुषे-	पिबसि	पिबथः (पाथः)	पिबथ (पाथ)
	उत्तमपुरुषे-	पिबामि	पिबावः	पिबामः (पिबामसि) ।
लुङि-	प्रथमपुरुषे-	अपात्	अपाताम्	अपुः
	मध्यमपुरुषे-	अपाः	अपातम्	अपात
	उत्तमपुरुषे-	अपाम्	अपाव	अपाम ।
लङि-	प्रथमपुरुषे-	अपिबत्	अपिबताम्	अपिबन्
	मध्यमपुरुषे-	अपिबः	अपिबतम्	अपिबत
	उत्तमपुरुषे-	अपिबम्	अपिबाव	अपिबाम ।
लिटि-	प्रथमपुरुषे-	पपौ[+]	पपतुः	पपुः
	मध्यमपुरुषे-	पपिथ-पपाथ	पपथुः	पप
	उत्तमपुरुषे-	पपौ	पपिव	पपिम ।
लृटि-	प्रथमपुरुषे-	पास्यति	पास्यतः	पास्यन्ति
	मध्यमपुरुषे-	पास्यसि	पास्यथः	पास्यथ
	उत्तमपुरुषे-	पास्यामि	पास्यावः	पास्यामः (पास्यामसि) ।
लुटि-	प्रथमपुरुषे-	पाता	पातारौ	पातारः
	मध्यमपुरुषे-	पातासि	पातास्थः	पातास्थ
	उत्तमपुरुषे-	पातास्मि	पातास्वः	पातास्मः (पातास्मसि) ।
लोटि-	प्रथमपुरुषे-	पिबतु (पातु)-पिबतात्	पिबताम्	पिबन्तु
	मध्यमपुरुषे-	पिब (पिबा, पाहि)-पिबतात्	पिबतम्	पिबत (पिबता, पिबतन, पिबथन)
	उत्तमपुरुषे-	पिबानि (पिबा)	पिबाव	पिबाम ।

[#] आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः *पिबति* तद्रसम् ॥ हितोपदेशे २।१४६

[*] *पिबन्ति* मधु पुष्पेभ्यो भृङ्गाः केसरधूसराः ।
हंसाः शैवालमश्नन्ति धिग् दैवमसमञ्जसम् ॥ सुभाषितावली ।

[+] स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥ रघुवंशे २।६९

CC-0. In Public Domain. Digitization by eGangotri

६. 'गम्लृ गतौ' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	गच्छति# (गमति, जगति)	गच्छतः	गच्छन्ति
	मध्यमपुरुषे-	गच्छसि	गच्छथः	गच्छथ
	उत्तमपुरुषे-	गच्छामि	गच्छावः	गच्छामः (गच्छामसि) ।
लुङि-	प्रथमपुरुषे-	अगमत्* (अगन्)	अगमताम्	अगमन् (अग्मन्)
	मध्यमपुरुषे-	अगमः	अगमतम्	अगमत
	उत्तमपुरुषे-	अगमम्	अगमाव	अगमाम (अगन्म) ।
लङि-	प्रथमपुरुषे-	अगच्छत् (अजगत्)	अगच्छताम्	अगच्छन्
	मध्यमपुरुषे-	अगच्छः	अगच्छतम्	अगच्छत
	उत्तमपुरुषे-	अगच्छम्	अगच्छाव	अगच्छाम ।
लिटि-	प्रथमपुरुषे-	जगाम	जग्मतुः+	जग्मुः
	मध्यमपुरुषे-	जगमिथ-जगन्थ	जग्मथुः	जग्म
	उत्तमपुरुषे-	जगाम-जगम (जगमा)	जग्मिव	जग्मिम ।
लृटि-	प्रथमपुरुषे-	गमिष्यति	गमिष्यतः	गमिष्यन्ति
	मध्यमपुरुषे-	गमिष्यसि	गमिष्यथः	गमिष्यथ
	उत्तमपुरुषे-	गमिष्यामि	गमिष्यावः	गमिष्यामः (गमिष्यामसि) ।
लुटि-	प्रथमपुरुषे-	गन्ता	गन्तारौ	गन्तारः
	मध्यमपुरुषे-	गन्तासि	गन्तास्थः	गन्तास्थ
	उत्तमपुरुषे-	गन्तास्मि	गन्तास्वः	गन्तास्मः (गन्तास्मसि) ।
लोटि-	प्रथमपुरुषे-	गच्छतु(गन्तु)-गच्छतात्	गच्छताम्	गच्छन्तु
	मध्यमपुरुषे-	गच्छ(गहि)-गच्छतात्	गच्छतम् (गन्तम्)	गच्छत (गन्त, गन्ता, गन्तन)
	उत्तमपुरुषे-	गच्छानि (गच्छा)	गच्छाव	गच्छाम ।

काव्यशास्त्रविनोदेन कालो *गच्छति* धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ हितोपदेशे १।१

* यच् चकार विवरं शिलाघने ताडकोरसि स रामसायकः ।
अप्रविष्टविषयस्य रक्षसां द्वारता*मगमद*न्तकस्य तत् ॥ रघुवंशे ११।१८

+ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर् *जग्मतु*राश्रमम् ॥ रघुवंशे १।३५

CC-0. In Public Domain. Digitization by eGangotri

७. 'शीङ् स्वप्ने' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	*द्विवचने*	*बहुवचने*
लटि-	प्रथमपुरुषे-	**शेते** (शयते, शये)	**शयाते**	**शेरते**[#] (शेरे, शयन्ति)
	मध्यमपुरुषे-	**शेषे**	**शयाथे**	**शेध्वे** (शयध्वे)
	उत्तमपुरुषे-	**शये**	**शेवहे**	**शेमहे ।**
लुङि-	प्रथमपुरुषे-	**अशयिष्ट**	**अशयिषाताम्**	**अशयिषत**
	मध्यमपुरुषे-	**अशयिष्ठाः**	**अशयिषाथाम्**	**अशयिढ्वम्-अशयिध्वम्**
	उत्तमपुरुषे-	**अशयिषि**	**अशयिष्वहि**	**अशयिष्महि ।**
लङि-	प्रथमपुरुषे-	**अशेत** (अशायत्)	**अशयाताम्**	**अशेरत**
	मध्यमपुरुषे-	**अशेथाः**	**अशयाथाम्**	**अशेध्वम्**
	उत्तमपुरुषे-	**अशयि**	**अशेवहि**	**अशेमहि ।**
लिटि-	प्रथमपुरुषे-	**शिश्ये**[*]	**शिश्याते**	**शिश्यिरे**
	मध्यमपुरुषे-	**शिश्यिषे**	**शिश्याथे**	**शिश्यिढ्वे-शिश्यिध्वे**
	उत्तमपुरुषे-	**शिश्ये**	**शिश्यिवहे**	**शिश्यिमहे ।**
लृटि-	प्रथमपुरुषे-	**शयिष्यते**	**शयिष्येते**	**शयिष्यन्ते**
	मध्यमपुरुषे-	**शयिष्यसे**	**शयिष्येथे**	**शयिष्यध्वे**
	उत्तमपुरुषे-	**शयिष्ये**	**शयिष्यावहे**	**शयिष्यामहे ।**
लुटि-	प्रथमपुरुषे-	**शयिता**	**शयितारौ**	**शयितारः**
	मध्यमपुरुषे-	**शयितासे**	**शयितासाथे**	**शयिताध्वे**
	उत्तमपुरुषे-	**शयिताहे**	**शयितास्वहे**	**शयितास्महे ।**
लोटि-	प्रथमपुरुषे-	**शेताम्** (शयाम्)	**शयाताम्**	**शेरताम्**
	मध्यमपुरुषे-	**शेष्व**	**शयाथाम्**	**शेध्वम्**
	उत्तमपुरुषे-	**शयै**	**शयावहै**	**शयामहै ।**

[#] विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे ***शेरते*** तेऽभिमारुतम् ॥ शिशुपालवधे २।४२

[*] प्रभावस्तम्भितच्छायमाश्रितः स वनस्पतिम् ।
कदाचिदङ्के सीतायाः ***शिश्ये*** किञ्चिदिव श्रमात् ॥ रघुवंशे १२।२१

CC-0. In Public Domain. Digitization by eGangotri

८. 'अस भुवि' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	*द्विवचने*	*बहुवचने*
लटि-	प्रथमपुरुषे-	अस्ति	स्तः	सन्ति
	मध्यमपुरुषे-	असि	स्थः	स्थ (स्था)
	उत्तमपुरुषे-	अस्मि	स्वः	स्मः (स्मसि) ।
लुङि-	प्रथमपुरुषे-	अभूत्	अभूताम् (अभूयाम्)	अभूवन् (अभुवन्)
	मध्यमपुरुषे-	अभूः (अभुवः)	अभूतम्	अभूत (अभूतन, अभूथन)
	उत्तमपुरुषे-	अभूवम् (अभूम्)	अभूव	अभूम ।
लङि-	प्रथमपुरुषे-	आसीत्# (आः)	आस्ताम्	आसन्
	मध्यमपुरुषे-	आसीः	आस्तम्	आस्त
	उत्तमपुरुषे-	आसम्	आस्व	आस्म ।
लिटि-	प्रथमपुरुषे-	बभूव	बभूवतुः	बभूवुः
	मध्यमपुरुषे-	बभूविथ	बभूवथुः	बभूव
	उत्तमपुरुषे-	बभूव	बभूविव	बभूविम ।
लृटि-	प्रथमपुरुषे-	भविष्यति	भविष्यतः	भविष्यन्ति
	मध्यमपुरुषे-	भविष्यसिं	भविष्यथः	भविष्यथ
	उत्तमपुरुषे-	भविष्यामि	भविष्यावः	भविष्यामः (भविष्यामसि) ।
लुटि-	प्रथमपुरुषे-	भविता	भवितारौ	भवितारः
	मध्यमपुरुषे-	भवितासि	भवितास्थः	भवितास्थ
	उत्तमपुरुषे-	भवितास्मि	भवितास्वः	भवितास्मः (भवितास्मसि) ।
लोटि-	प्रथमपुरुषे-	अस्तु*-स्तात्	स्ताम्	सन्तु*+
	मध्यमपुरुषे-	एधि(एहि)-स्तात्	स्तम्	स्त (स्ता, स्तात् , स्तन, स्थन)
	उत्तमपुरुषे-	असानि	असाव	असाम ।

शुचीनामेकबुद्धीनां सर्वेषां सम्प्रजानताम् ।
नाऽऽसीत् पुरे वा राष्ट्रे वा मृषावादी नरः क्व चित् ॥ रामायणे १।७।१४

* सन्धिः सर्वमहीभुजां विजयिनाम*प्यस्तु* मोदप्रदः सन्तः *सन्तु* निरापदः सुकृतिनां कीर्तिश् चिरं वर्धताम् ।
नीतिर् दुर्जननिग्रहाय सुजनक्षेमाय चाऽऽलम्बिता सर्वेषां हृदि वाचि कर्मणि सदा धर्मानुगा खेलतु ॥ प्रतिसंस्कृतहितोपदेशसमाप्तौ ।

+ कामं नृपाः *सन्तु* सहस्रशोऽन्ये राजन्वतीमाहुरनेन भूमिम् ।
नक्षत्रताराग्रहसङ्कुलाऽपि ज्योतिष्मती चन्द्रमसैव रात्रिः ॥ रघुवंशे ६।२२

CC-0. In Public Domain. Digitization by eGangotri

९. '(नि) भी भये' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	बिभेति#	बिभितः बिभीतः	बिभ्यति
	मध्यमपुरुषे-	बिभेषि	बिभिथः बिभीथः	बिभिथ बिभीथ
	उत्तमपुरुषे-	बिभेमि	बिभिवः बिभीवः	बिभिमः बिभीमः* (बिभिमसि, बिभीमसि)।
लुङि-	प्रथमपुरुषे-	अभैषीत्	अभैष्टाम्	अभैषुः
	मध्यमपुरुषे-	अभैषीः (अभैः)	अभैष्टम्	अभैष्ट
	उत्तमपुरुषे-	अभैषम्	अभैष्व	अभैष्म।
लङि-	प्रथमपुरुषे-	अबिभेत्	अबिभिताम् अबिभीताम्	अबिभयुः
	मध्यमपुरुषे-	अबिभेः	अबिभितम् अबिभीतम्	अबिभित अबिभीत
	उत्तमपुरुषे-	अबिभयम्	अबिभिव अबिभीव	अबिभिम अबिभीम।
लिटि-	प्रथमपुरुषे-	बिभयाञ्चकार	बिभयाञ्चक्रतुः	बिभयाञ्चक्रुः
	मध्यमपुरुषे-	बिभयाञ्चकर्थ	बिभयाञ्चक्रथुः	बिभयाञ्चक्र
	उत्तमपुरुषे-	बिभयाञ्चकार-बिभयाञ्चकर	बिभयाञ्चकृव	बिभयाञ्चकृम।
पक्षान्तरे-	प्र.-	बिभयाम्बभूव	बिभयाम्बभूवतुः	बिभयाम्बभूवुः
	म.-	बिभयाम्बभूविथ	बिभयाम्बभूवथुः	बिभयाम्बभूव
	उ.-	बिभयाम्बभूव	बिभयाम्बभूविव	बिभयाम्बभूविम।
पक्षान्तरे-	प्र.-	बिभयामास	बिभयामासतुः	बिभयामासुः
	म.-	बिभयामासिथ	बिभयामासथुः	बिभयामास
	उ.-	बिभयामास	बिभयामासिव	बिभयामासिम।
पक्षान्तरे-	प्र.-	बिभाय	बिभ्यतुः	बिभ्युः
	म.-	बिभयिथ-बिभेथ	बिभ्यथुः	बिभ्य
	उ.-	बिभाय-बिभय	बिभ्यिव	बिभ्यिम।
लृटि-	प्रथमपुरुषे-	भेष्यति	भेष्यतः	भेष्यन्ति
	मध्यमपुरुषे-	भेष्यसि	भेष्यथः	भेष्यथ
	उत्तमपुरुषे-	भेष्यामि	भेष्यावः	भेष्यामः (भेष्यामसि)।
लुटि-	प्रथमपुरुषे-	भेता	भेतारौ	भेतारः
	मध्यमपुरुषे-	भेतासि	भेतास्थः	भेतास्थ
	उत्तमपुरुषे-	भेतास्मि	भेतास्वः	भेतास्मः (भेतास्मसि)।
लोटि-	प्रथमपुरुषे-	बिभेतु-बिभितात्-बिभीतात्	बिभिताम्-बिभीताम्	बिभ्यतु
	मध्यमपुरुषे-	बिभिहि-बिभीहि-बिभितात्-बिभीतात्	बिभितम्-बिभीतम्	बिभित-बिभीत
	उत्तमपुरुषे-	बिभयानि	बिभयाव	बिभयाम।

\# *बिभेति* नीचो दोषज्ञात् प्रकाशनपटीयसः। न पुनर् मूढहृदयो निन्दनीयात् स्वकर्मणः ॥ सुभाषितावलौ।

* *बिभीमो* वयमत्यन्तं चाक्रिकस्य गुणादपि। सम्पन्नमपि यः पात्रं गुणेनैव निकृन्तति ॥ सुभाषितावलौ।

CC-0. In Public Domain. Digitization by eGangotri

१०. '(डु) दाञ् दाने' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	ददाति (दाति)	दत्तः	ददति
	मध्यमपुरुषे-	ददासि#	दत्थः	दत्थ
	उत्तमपुरुषे-	ददामि	दद्वः	दद्मः (दद्मसि) ।
लुङि-	प्रथमपुरुषे-	अदात्	अदाताम्	अदुः
	मध्यमपुरुषे-	अदाः	अदातम्	अदात
	उत्तमपुरुषे-	अदाम्	अदाव	अदाम ।
लङि-	प्रथमपुरुषे-	अददात्	अदत्ताम्	अददुः
	मध्यमपुरुषे-	अददाः	अदत्तम्	अदत्त
	उत्तमपुरुषे-	अददाम्	अदद्व	अदद्म ।
लिटि-	प्रथमपुरुषे-	ददौ	ददतुः	ददुः*
	मध्यमपुरुषे-	ददिथ-ददाथ	ददथुः	दद
	उत्तमपुरुषे-	ददौ	ददिव	ददिम ।
लृटि-	प्रथमपुरुषे-	दास्यति	दास्यतः	दास्यन्ति
	मध्यमपुरुषे-	दास्यसि	दास्यथः	दास्यथ
	उत्तमपुरुषे-	दास्यामि	दास्यावः	दास्यामः (दास्यामसि) ।
लुटि-	प्रथमपुरुषे-	दाता	दातारौ	दातारः
	मध्यमपुरुषे-	दातासि	दातास्थः	दातास्थ
	उत्तमपुरुषे-	दातास्मि	दातास्वः	दातास्मः (दातास्मसि) ।
लोटि-	प्रथमपुरुषे-	ददातु-दत्तात्	दत्ताम्	ददतु
	मध्यमपुरुषे-	देहि(दद्धि)-दत्तात्	दत्तम्	दत्त (दत्ता, दत्तन, ददातन, ददायन)
	उत्तमपुरुषे-	ददानि	ददाव	ददाम ।

यत् करोषि यदश्नासि यज जुहोषि *ददासि* यत् ।
यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम ॥ गीतायाम् ९।२७

* ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य *ददुस्* तस्मै यशः स्वमिव सञ्चितम् ॥ रघुवंशे ४।५०

CC-0. In Public Domain. Digitization by eGangotri

'(डु) दाञ् दाने' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	दत्ते#	ददाते	ददते
	मध्यमपुरुषे-	दत्से	ददाथे	दद्ध्वे
	उत्तमपुरुषे-	ददे	दद्वहे	दद्महे ।
लुङि-	प्रथमपुरुषे-	अदित	अदिषाताम्	अदिषत
	मध्यमपुरुषे-	अदिथाः	अदिषाथाम्	अदिड्ढ्वम्
	उत्तमपुरुषे-	अदिषि	अदिष्वहि	अदिष्महि ।
लङि-	प्रथमपुरुषे-	अदत्त*	अददाताम्	अददत
	मध्यमपुरुषे-	अदत्थाः	अददाथाम्	अदद्ध्वम्
	उत्तमपुरुषे-	अददि	अदद्वहि	अदद्महि ।
लिटि-	प्रथमपुरुषे-	ददे	ददाते	ददिरे
	मध्यमपुरुषे-	ददिषे	ददाथे	ददिध्वे
	उत्तमपुरुषे-	ददे	ददिवहे	ददिमहे ।
लृटि-	प्रथमपुरुषे-	दास्यते	दास्येते	दास्यन्ते
	मध्यमपुरुषे-	दास्यसे	दास्येथे	दास्यध्वे
	उत्तमपुरुषे-	दास्ये	दास्यावहे	दास्यामहे ।
लुटि-	प्रथमपुरुषे-	दाता	दातारौ	दातारः
	मध्यमपुरुषे-	दातासे	दातासाथे	दाताध्वे
	उत्तमपुरुषे-	दाताहे	दातास्वहे	दातास्महे ।
लोटि-	प्रथमपुरुषे-	दत्ताम्	ददाताम् (दाताम्)	ददताम्
	मध्यमपुरुषे-	दत्स्व+	ददाथाम्	दद्ध्वम् (दद्ध्वात्)
	उत्तमपुरुषे-	ददै	ददावहै	ददामहै ।

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमा*दत्ते* हि रसं रविः ॥ रघुवंशे १।१८

* कराभिघातोत्थितकन्दुकेयमालोक्य बालाऽतिकुतूहलेन ।
ह्रदात् पतज् ज्योतिरिवान्तरिक्षा*दादत्त* जैत्राभरणं त्वदीयम् ॥ रघुवंशे १६।८३

* प्रतिवाच*मदत्त* केशवः शपमानाय न चेदिभूभुजे ।
अनुहुङ्कुरुते घनध्वनिं न तु गोमायुरुतानि केसरी ॥ हितोपदेशे २।८७

\+ सम्मोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम् ।
गान्धर्वमा*दत्स्व* यतः प्रयोक्तुर् न चारिहिंसा विजयश्च हस्ते ॥ रघुवंशे ५।५७

CC-0. In Public Domain. Digitization by eGangotri

११. '(डु) कृञ् करणे' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	करोति#	कुरुतः	कुर्वन्ति
	मध्यमपुरुषे-	करोषि	कुरुथः	कुरुथ
	उत्तमपुरुषे-	करोमि (कुर्मि)	कुर्वः	कुर्मः (कुर्मसि)।
लुङि-	प्रथमपुरुषे-	अकार्षीत् (अकः)	अकार्ष्टाम् (अक्राताम्)	अकार्षुः (अक्रन्)
	मध्यमपुरुषे-	अकार्षीः (अकः)	अकार्ष्टम् (अक्रतम्)	अकार्ष्ट (अक्रत)
	उत्तमपुरुषे-	अकार्षम् (अकरम्)	अकार्ष्व (अकर्व)	अकार्ष्म (अकर्म)।
लङि-	प्रथमपुरुषे-	अकरोत्	अकुरुताम्	अकुर्वन्
	मध्यमपुरुषे-	अकरोः	अकुरुतम्	अकुरुत
	उत्तमपुरुषे-	अकरवम्	अकुर्व	अकुर्म।
लिटि-	प्रथमपुरुषे-	चकार	चक्रतुः*	चक्रुः
	मध्यमपुरुषे-	चकर्थ	चक्रथुः	चक्र
	उत्तमपुरुषे-	चकार-चकर	चकृव	चकृम।
लृटि-	प्रथमपुरुषे-	करिष्यति	करिष्यतः	करिष्यन्ति
	मध्यमपुरुषे-	करिष्यसि	करिष्यथः	करिष्यथ
	उत्तमपुरुषे-	करिष्यामि	करिष्यावः	करिष्यामः (करिष्यामसि)।
लुटि-	प्रथमपुरुषे-	कर्ता	कर्तारौ	कर्तारः
	मध्यमपुरुषे-	कर्तासि	कर्तास्थः	कर्तास्थ
	उत्तमपुरुषे-	कर्तास्मि	कर्तास्वः	कर्तास्मः (कर्तास्मसि)।
लोटि-	प्रथमपुरुषे-	करोतु-कुरुतात्	कुरुताम्	कुर्वन्तु
	मध्यमपुरुषे-	कुरु°-कुरुतात्	कुरुतम्	कुरुत
	उत्तमपुरुषे-	करवाणि (करवा)	करवाव	करवाम।

शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान्।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण *करोत्यरोगम्*॥ हितोपदेशे १।१७१

* रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः।
तद्वियोगव्यथां किञ्चिच्च छिथिली *चक्रतुः* सुतौ॥ रघुवंशे १५।३४

° आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः।
तत्राभिषेकं *कुरु* पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा॥ हितोपदेशे ४।८६

CC-0. In Public Domain. Digitization by eGangotri

'(डु) कृञ् करणे' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	*द्विवचने*	*बहुवचने*
लटि-	प्रथमपुरुषे-	कुरुते	कुर्वाते	कुर्वते[#]
	मध्यमपुरुषे-	कुरुषे	कुर्वाथे	कुरुध्वे
	उत्तमपुरुषे-	कुर्वे	कुर्वहे	कुर्महे ।
लुङि-	प्रथमपुरुषे-	अकृत	अकृषाताम्	अकृषत (अकर्त)
	मध्यमपुरुषे-	अकृथाः	अकृषाथाम्	अकृढ्वम्
	उत्तमपुरुषे-	अकृषि (अक्रि)	अकृष्वहि	अकृष्महि ।
लङि-	प्रथमपुरुषे-	अकुरुत	अकुर्वाताम्	अकुर्वत
	मध्यमपुरुषे-	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
	उत्तमपुरुषे-	अकुर्वि	अकुर्वहि	अकुर्महि ।
लिटि-	प्रथमपुरुषे-	चक्रे[*]	चक्राते	चक्रिरे
	मध्यमपुरुषे-	चकृषे	चक्राथे	चकृढ्वे
	उत्तमपुरुषे-	चक्रे	चकृवहे	चकृमहे ।
लृटि-	प्रथमपुरुषे-	करिष्यते	करिष्येते	करिष्यन्ते
	मध्यमपुरुषे-	करिष्यसे	करिष्येथे	करिष्यध्वे
	उत्तमपुरुषे-	करिष्ये[+]	करिष्यावहे	करिष्यामहे ।
लुटि-	प्रथमपुरुषे-	कर्ता	कर्तारौ	कर्तारः
	मध्यमपुरुषे-	कर्तासे	कर्तासाथे	कर्ताध्वे
	उत्तमपुरुषे-	कर्ताहे	कर्तास्वहे	कर्तास्महे ।
लोटि-	प्रथमपुरुषे-	कुरुताम्	कुर्वाताम्	कुर्वताम्
	मध्यमपुरुषे-	कुरुष्व	कुर्वाथाम्	कुरुध्वम् (कुरुध्वात्-कृध्वात्)
	उत्तमपुरुषे-	करवै (करवे)	करवावहै	करवामहै ।

विरोधिवचसो मूकान् वागीशानपि *कुर्वते*।
जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः ॥ शिशुपालवधे २।२५

* राम इत्यभिरामेण वपुषा तस्य चोदितः ।
नामधेयं गुरुश् *चक्रे* जगत्प्रथममङ्गलम् ॥ रघुवंशे १०।६७

\+ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान् मयाऽच्युत ।
स्थितोऽस्मि गतसन्देहः *करिष्ये* वचनं तव ॥ गीतायाम् १८।७३

CC-0. In Public Domain. Digitization by eGangotri

१२. '(डु) क्रीञ् द्रव्यविनिमये' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	क्रीणाति	क्रीणीतः	क्रीणन्ति#
	मध्यमपुरुषे-	क्रीणासि	क्रीणीथः	क्रीणीथ
	उत्तमपुरुषे-	क्रीणामि	क्रीणीवः	क्रीणीमः (क्रीणामसि) ।
लुङि-	प्रथमपुरुषे-	अक्रैषीत्	अक्रैष्टाम्	अक्रैषुः
	मध्यमपुरुषे-	अक्रैषीः	अक्रैष्टम्	अक्रैष्ट
	उत्तमपुरुषे-	अक्रैषम्	अक्रैष्व	अक्रैष्म ।
लङि-	प्रथमपुरुषे-	अक्रीणात्	अक्रीणीताम्	अक्रीणन्
	मध्यमपुरुषे-	अक्रीणाः	अक्रीणीतम्	अक्रीणीत
	उत्तमपुरुषे-	अक्रीणाम्	अक्रीणीव	अक्रीणीम ।
लिटि-	प्रथमपुरुषे-	चिक्राय	चिक्रियतुः	चिक्रियुः
	मध्यमपुरुषे-	चिक्रयिथ-चिक्रेथ	चिक्रियथुः	चिक्रिय
	उत्तमपुरुषे-	चिक्राय-चिक्रय	चिक्रियिव	चिक्रियिम ।
लृटि-	प्रथमपुरुषे-	क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति
	मध्यमपुरुषे-	क्रेष्यसि	क्रेष्यथः	क्रेष्यथ
	उत्तमपुरुषे-	क्रेष्यामि	क्रेष्यावः	क्रेष्यामः (क्रेष्यामसि) ।
लुटि-	प्रथमपुरुषे-	क्रेता	क्रेतारौ	क्रेतारः
	मध्यमपुरुषे-	क्रेतासि	क्रेतास्थः	क्रेतास्थ
	उत्तमपुरुषे-	क्रेतास्मि	क्रेतास्वः	क्रेतास्मः (क्रेतास्मसि) ।
लोटि-	प्रथमपुरुषे-	क्रीणातु-क्रीणीतात्	क्रीणीताम्	क्रीणन्तु
	मध्यमपुरुषे-	क्रीणीहि-क्रीणीतात्	क्रीणीतम्	क्रीणीत
	उत्तमपुरुषे-	क्रीणानि	क्रीणाव	क्रीणाम ।

वराटिकोपक्रिययापि लभ्यान् नेभ्याः कृतज्ञानथवाऽऽद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः *क्रीणन्ति* तानेव तु हन्त सन्तः ॥ नैषधीयचरिते ३।८८

CC-0. In Public Domain. Digitization by eGangotri

'(ङ) क्रीञ् द्रव्यविनिमये' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	क्रीणीते	क्रीणाते	क्रीणते
	मध्यमपुरुषे-	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
	उत्तमपुरुषे-	क्रीणे	क्रीणीवहे	क्रीणीमहे ।
लुङि-	प्रथमपुरुषे-	अक्रेष्ट	अक्रेषाताम्	अक्रेषत
	मध्यमपुरुषे-	अक्रेष्ठाः	अक्रेषाथाम्	अक्रेढ्वम्
	उत्तमपुरुषे-	अक्रेषि	अक्रेष्वहि	अक्रेष्महि ।
लङि-	प्रथमपुरुषे-	अक्रीणीत	अक्रीणाताम्	अक्रीणत
	मध्यमपुरुषे-	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
	उत्तमपुरुषे-	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि ।
लिटि-	प्रथमपुरुषे-	चिक्रिये	चिक्रियाते	चिक्रियिरे
	मध्यमपुरुषे-	चिक्रियिषे	चिक्रियाथे	चिक्रियिढ्वे-चिक्रियिध्वे
	उत्तमपुरुषे-	चिक्रिये	चिक्रियिवहे	चिक्रियिमहे ।
लृटि-	प्रथमपुरुषे-	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
	मध्यमपुरुषे-	क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
	उत्तमपुरुषे-	क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे ।
लुटि-	प्रथमपुरुषे-	क्रेता	क्रेतारौ	क्रेतारः
	मध्यमपुरुषे-	क्रेतासे	क्रेतासाथे	क्रेताध्वे
	उत्तमपुरुषे-	क्रेताहे	क्रेतास्वहे	क्रेतास्महे ।
लोटि-	प्रथमपुरुषे-	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
	मध्यमपुरुषे-	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
	उत्तमपुरुषे-	क्रीणै	क्रीणावहै	क्रीणामहै ।

CC-0. In Public Domain. Digitization by eGangotri

१३. 'चुर स्तेये' इत्यस्य धातोः कर्तरि लकारे परस्मैपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	चोरयति	चोरयतः	चोरयन्ति
	मध्यमपुरुषे-	चोरयसि	चोरयथः	चोरयथ
	उत्तमपुरुषे-	चोरयामि	चोरयावः	चोरयामः (चोरयामसि) ।
लुङि-	प्रथमपुरुषे-	अचूचुरत्[#]	अचूचुरताम्	अचूचुरन्
	मध्यमपुरुषे-	अचूचुरः	अचूचुरतम्	अचूचुरत
	उत्तमपुरुषे-	अचूचुरम्	अचूचुराव	अचूचुराम ।
लङि-	प्रथमपुरुषे-	अचोरयत्	अचोरयताम्	अचोरयन्
	मध्यमपुरुषे-	अचोरयः	अचोरयतम्	अचोरयत
	उत्तमपुरुषे-	अचोरयम्	अचोरयाव	अचोरयाम ।
लिटि-	प्रथमपुरुषे-	चोरयाञ्चकार	चोरयाञ्चक्रतुः	चोरयाञ्चक्रुः
	मध्यमपुरुषे-	चोरयाञ्चकर्थ	चोरयाञ्चक्रथुः	चोरयाञ्चक्र
	उत्तमपुरुषे-	चोरयाञ्चकार-चोरयाञ्चकर	चोरयाञ्चकृव	चोरयाञ्चकृम ।
पक्षान्तरे-	प्र.-	चोरयाम्बभूव	चोरयाम्बभूवतुः	चोरयाम्बभूवुः
	म.-	चोरयाम्बभूविथ	चोरयाम्बभूवथुः	चोरयाम्बभूव
	उ.-	चोरयाम्बभूव	चोरयाम्बभूविव	चोरयाम्बभूविम ।
पक्षान्तरे-	प्र.-	चोरयामास	चोरयामासतुः	चोरयामासुः
	म.-	चोरयामासिथ	चोरयामासथुः	चोरयामास
	उ.-	चोरयामास	चोरयामासिव	चोरयामासिम ।
लृटि-	प्रथमपुरुषे-	चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति
	मध्यमपुरुषे-	चोरयिष्यसि	चोरयिष्यथः	चोरयिष्यथ
	उत्तमपुरुषे-	चोरयिष्यामि	चोरयिष्यावः	चोरयिष्यामः (चोरयिष्यामसि) ।
लुटि-	प्रथमपुरुषे-	चोरयिता	चोरयितारौ	चोरयितारः
	मध्यमपुरुषे-	चोरयितासि	चोरयितास्थः	चोरयितास्थ
	उत्तमपुरुषे-	चोरयितास्मि	चोरयितास्वः	चोरयितास्मः (चोरयितास्मसि) ।
लोटि-	प्रथमपुरुषे-	चोरयतु-चोरयतात्	चोरयताम्	चोरयन्तु
	मध्यमपुरुषे-	चोरय-चोरयतात्	चोरयतम्	चोरयत
	उत्तमपुरुषे-	चोरयाणि	चोरयाव	चोरयाम ।

[#] महामहानीलशिलारुचः पुरो निषेदिवान् कंसकृषः स विष्टरे ।
श्रितोदयाद्रेरभिसायमुच्चकैरचूचुरच् चन्द्रमसोऽभिरामताम् ॥ शिशुपालवधे १।१६

CC-0. In Public Domain. Digitization by eGangotri

'चुर स्तेये' इत्यस्य धातोः कर्तरि लकारे आत्मनेपदे रूपाणि-

		एकवचने	द्विवचने	बहुवचने
लटि-	प्रथमपुरुषे-	चोरयते	चोरयेते	चोरयन्ते
	मध्यमपुरुषे-	चोरयसे	चोरयेथे	चोरयध्वे
	उत्तमपुरुषे-	चोरये	चोरयावहे	चोरयामहे ।
लुङि-	प्रथमपुरुषे-	अचूचुरत	अचूचुरेताम्	अचूचुरन्त
	मध्यमपुरुषे-	अचूचुरथाः	अचूचुरेथाम्	अचूचुरध्वम्
	उत्तमपुरुषे-	अचूचुरे	अचूचुरावहि	अचूचुरामहि ।
लङि-	प्रथमपुरुषे-	अचोरयत	अचोरयेताम्	अचोरयन्त
	मध्यमपुरुषे-	अचोरयथाः	अचोरयेथाम्	अचोरयध्वम्
	उत्तमपुरुषे-	अचोरये	अचोरयावहि	अचोरयामहि ।
लिटि-	प्रथमपुरुषे-	चोरयाञ्चक्रे	चोरयाञ्चक्राते	चोरयाञ्चक्रिरे
	मध्यमपुरुषे-	चोरयाञ्चकृषे	चोरयाञ्चक्राथे	चोरयाञ्चकृढ्वे
	उत्तमपुरुषे-	चोरयाञ्चक्रे	चोरयाञ्चकृवहे	चोरयाञ्चकृमहे ।
पक्षान्तरे-	प्र.-	चोरयाम्बभूव	चोरयाम्बभूवतुः	चोरयाम्बभूवुः
	म.-	चोरयाम्बभूविथ	चोरयाम्बभूवथुः	चोरयाम्बभूव
	उ.-	चोरयाम्बभूव	चोरयाम्बभूविव	चोरयाम्बभूविम ।
पक्षान्तरे-	प्र.-	चोरयामास	चोरयामासतुः	चोरयामासुः
	म.-	चोरयामासिथ	चोरयामासथुः	चोरयामास
	उ.-	चोरयामास	चोरयामासिव	चोरयामासिम ।
लृटि-	प्रथमपुरुषे-	चोरयिष्यते	चोरयिष्येते	चोरयिष्यन्ते
	मध्यमपुरुषे-	चोरयिष्यसे	चोरयिष्येथे	चोरयिष्यध्वे
	उत्तमपुरुषे-	चोरयिष्ये	चोरयिष्यावहे	चोरयिष्यान्हे ।
लुटि-	प्रथमपुरुषे-	चोरयिता	चोरयितारौ	चोरयितारः
	मध्यमपुरुषे-	चोरयितासे	चोरयितासाथे	चोरयिताध्वे
	उत्तमपुरुषे-	चोरयिताहे	चोरयितास्वहे	चोरयितास्महे ।
लोटि-	प्रथमपुरुषे-	चोरयताम्	चोरयेताम्	चोरयन्ताम्
	मध्यमपुरुषे-	चोरयस्व	चोरयेथाम्	चोरयध्वम्
	उत्तमपुरुषे-	चोरयै	चोरयावहै	चोरयामहै ।

CC-0. In Public Domain. Digitization by eGangotri

३. गुणनसारणी

६ × १ = ६ षट् सकृत् षट्
६ × २ = १२ षड् द्विर् द्वादश
६ × ३ = १८ षट् त्रिरष्टादश
६ × ४ = २४ षट् चतुश् चतुर्विंशतिः
६ × ५ = ३० षट् पञ्चकृत्वस् त्रिंशत्
६ × ६ = ३६ षट् षट्कृत्वष् षट्त्रिंशत्
६ × ७ = ४२ षट् सप्तकृत्वो द्विचत्वारिंशत्
६ × ८ = ४८ षडष्टकृत्वोऽष्टाचत्वारिंशत्
६ × ९ = ५४ षण् नवकृत्वश् चतुःपञ्चाशत्
६ × १० = ६० षड् दशकृत्वष् षष्टिः ।

७ × १ = ७ सप्त सकृत् सप्त
७ × २ = १४ सप्त द्विश् चतुर्दश
७ × ३ = २१ सप्त त्रिरेकविंशतिः
७ × ४ = २८ सप्त चतुरष्टाविंशतिः
७ × ५ = ३५ सप्त पञ्चकृत्वः पञ्चत्रिंशत्
७ × ६ = ४२ सप्त षट्कृत्वो द्विचत्वारिंशत्
७ × ७ = ४९ सप्त सप्तकृत्व ऊनपञ्चाशत्
७ × ८ = ५६ सप्ताऽष्टकृत्वष् षट्पञ्चाशत्
७ × ९ = ६३ सप्त नवकृत्वस् त्रिषष्टिः
७ × १० = ७० सप्त दशकृत्वस् सप्ततिः ।

८ × १ = ८ अष्ट सकृदष्ट
८ × २ = १६ अष्ट द्विष् षोडश
८ × ३ = २४ अष्ट त्रिश् चतुर्विंशतिः
८ × ४ = ३२ अष्ट चतुर् द्वात्रिंशत्
८ × ५ = ४० अष्ट पञ्चकृत्वश् चत्वारिंशत्
८ × ६ = ४८ अष्ट षट्कृत्वोऽष्टाचत्वारिंशत्
८ × ७ = ५६ अष्ट सप्तकृत्वष् षट्पञ्चाशत्
८ × ८ = ६४ अष्टाऽष्टकृत्वश् चतुष्षष्टिः
८ × ९ = ७२ अष्ट नवकृत्वो द्विसप्ततिः
८ × १० = ८० अष्ट दशकृत्वोऽशीतिः ।

९ × १ = ९ नव सकृन् नव
९ × २ = १८ नव द्विरष्टादश
९ × ३ = २७ नव त्रिस् सप्तविंशतिः
९ × ४ = ३६ नव चतुष् षट्त्रिंशत्
९ × ५ = ४५ नव पञ्चकृत्वः पञ्चचत्वारिंशत्
९ × ६ = ५४ नव षट्कृत्वश् चतुष्पञ्चाशत्
९ × ७ = ६३ नव सप्तकृत्वस् त्रिषष्टिः
९ × ८ = ७२ नवाऽष्टकृत्वो द्विसप्ततिः
९ × ९ = ८१ नव नवकृत्व एकाशीतिः
९ × १० = ९० नव दशकृत्वो नवतिः ।

१० × १ = १० दश सकृद् दश
१० × २ = २० दश द्विर् विंशतिः
१० × ३ = ३० दश त्रिस् त्रिंशत्
१० × ४ = ४० दश चतुश् चत्वारिंशत्
१० × ५ = ५० दश पञ्चकृत्वः पञ्चाशत्
१० × ६ = ६० दश षट्कृत्वष् षष्टिः
१० × ७ = ७० दश सप्तकृत्वस् सप्ततिः
१० × ८ = ८० दशाऽष्टकृत्वोऽशीतिः
१० × ९ = ९० दश नवकृत्वो नवतिः
१०×१०= १०० दश दशकृत्वश् शतम् ।

११ × १ = ११ एकादश सकृदेकादश
११ × २ = २२ एकादश द्विर् द्वाविंशतिः
११ × ३ = ३३ एकादश त्रिस् त्रयस्त्रिंशत्
११ × ४ = ४४ एकादश चतुश् चतुश्चत्वारिंशत्
११ × ५ = ५५ एकादश पञ्चकृत्वः पञ्चपञ्चाशत्
११ × ६ = ६६ एकादश षट्कृत्वष् षट्षष्टिः
११ × ७ = ७७ एकादश सप्तकृत्वस् सप्तसप्ततिः
११ × ८ = ८८ एकादशाऽष्टकृत्वोऽष्टाशीतिः
११ × ९ = ९९ एकादश नवकृत्व एकान्नशतम्
११×१०=११० एकादश दशकृत्वश् शतञ्च दश च ।

CC-0. In Public Domain. Digitization by eGangotri

४. वैदिकशास्त्रपरिचयः

ऋग्वेदञ्च यजुर्वेदं सामवेदमथर्वकम् । ऋषयो ब्रह्मणः प्रापुः *स्मृतिशास्त्रं* मनुस् तथा ॥
सप्तर्षयोऽथ मनवः प्रजानां पतयस् तथा । सदाचारस्य वक्तारः कर्तारश् च प्रकीर्तिताः ॥
शिक्षा कल्पो व्याकरणं निरुक्तं छन्द एव च । ज्योतिषं चेति षट् प्राहुर् *वेदाङ्गानि* महर्षयः ॥
प्रतिपदमनुपदं छन्दोभाषा स्मृतिस् तथा । मीमांसान्याय-तर्कौ च षड् *वेदोपाङ्गकान्यपि* ॥
वर्णानां च स्वराणां च मात्राया बल-साम्ययोः । पदान्ताद्योः संहिताया विचारो यत्र लभ्यते ॥
तत्सम्बद्धाश् चाऽपरेऽपि विषया यत्र वर्णिताः । भवन्ति सा हि प्रथमा विद्या *शिक्षेति* भाषिता ॥
मन्त्राँश् च ब्राह्मणं चाऽपि अनुगम्य्यर्षिभिः कृतम् । यज्ञादिकप्रयोगस्य शास्त्रं *कल्प* इहोच्यते ॥
वाक्ये पदानां च पदे प्रकृतेः प्रत्ययस्स्य च । कल्पनेन पदार्थाद्यान्वाख्या *व्याकरणं* स्मृतम् ॥
देवतावाचकादीनां पदानां व्याकृतेः परम् । वाक्यानुगं निर्वचनं *निरुक्तं* परिकीर्तितम् ॥
वैदिकानां लौकिकानां छन्दसां यत्र कीर्तितम् । लक्षणादि तदेवोक्तं *छन्दश्शास्त्रम्* महर्षिभिः ॥
सूर्यादिज्योतिषां यत्र यज्ञकालार्थसिद्धये । अयनं वर्ण्यते विज्ञैस् तज् *ज्योतिष*मुदाहृतम् ॥
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । मुखं व्याकरणम् प्रोक्तं निरुक्तं श्रोत्रमुच्यते ॥
छन्दः पादौ तु वेदस्स्य ज्योतिषं चक्षुरेव च । अतो वेदं साङ्गमाप्य ब्रह्मलोके महीयते ॥
वेदविद्याऽविरुद्धं यत् सा स्मृतिः शिष्टसम्मता । अप्रत्यक्षफलं विद्यात् साधनं *शास्त्रसञ्ज्ञितम्* ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंश्यानुचरितं चैव *पुराणम्* पञ्चलक्षणम् ॥
धर्मार्थकाममोक्षाणां ये फलानामभीप्सवः । शृणुयुस् ते पुराणानीत्येवमाहुर् महर्षयः ॥
कलौ दुर्मेधसां पुंसां धर्माचारोज्झितात्मनाम् । हिताय विदधे ब्रह्मा पुराणाख्यं सुधारसम् ॥
"पुराण-तर्क-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"
यज्ञानां तपसां चैव शुभानाञ् चैव कर्मणाम् । वेद एव द्विजातीनां निश्श्रेयसकरः परः ॥

वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनम् प्रमाणम् ।
नैतत् त्रयं यस्य भवेत् प्रमाणं कस् तस्य कुर्याद् वचनं प्रमाणम् ॥
विप्रो वृक्षस् तस्य मूलञ् च सन्ध्या वेदाश् शाखा धर्मकर्मादि पत्त्रम् ।
तस्मान् मूलं यत्नतो रक्षणीयञ् छिन्ने मूले नैव शाखा न पत्त्रम् ॥

श्रुतिः स्मृतिश् च विप्राणां चक्षुषी परिकीर्तिते । काणस् तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः ॥
श्रुति-स्मृति-पुराणानां विरोधे श्रौतमिष्यते । तथा स्मृतिपुराणानां विरोधे स्मार्तमेव च ॥

५. लगधमुनिप्रोक्तवेदाङ्गज्योतिषानुकूलं कालज्ञानम्

क्षणस् त्रुटस् त्रुटिस् स्त्रीत्वे सुसूक्ष्मे कालभागके । त्रुटिभ्यान् तु लवः प्रोक्तो लवाभ्याञ् च निमेषकः ॥
स एव मात्रेत्युक्तश् च लघ्वक्षरमितत्वतः । प्राणोऽनश्च निमेषश्च श्रुतावुक्ताः समार्थकाः ॥
ते पञ्चदश चेदानि क्लीबे काष्ठा स्त्रियाम् मता । इदानीनि पञ्चदश एतर्हि तानि पञ्च च ॥
दश क्षिप्रं तानि पञ्चदश प्रोक्तो मुहूर्तकः । तत्र स्वदशमांशेन युक्ताः स्युर् विंशतिः कलाः ॥

CC-0. In Public Domain. Digitization by eGangotri

मुहूर्तार्धं स्मृतो दण्डो नाडी वा घटिकाऽपि वा । घट्याः षष्टितमो भागः पलं स्याद् विघटीति वा ॥
नाडिकायाम् बुधैः प्रोक्ताः सविंशांशाः कला दश । अहोरात्रे कलानान् तु षट्शती त्र्यधिका स्मृता ॥
"त्र्यधिकं षट्शतं यच् च कलानां प्रविधीयते । तदहर् मानुषं ज्ञेयं नाक्षत्रं तु दशाधिकम् ॥"
त्रिंशन्मुहूर्तोऽहोरात्रः पक्षस् ते दश पञ्च च । प्रतिपच् च द्वितीया च तृतीया च चतुर्थ्यपि ॥
पञ्चमी चैव षष्ठी च सप्तमी चाष्टमी ततः । नवमी दशमी चैकादशी च द्वादशी तथा ॥
त्रयोदशी चाऽथ चतुर्दश्यथो पौर्णमास्यमे । पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस् तु तावुभौ ॥
तपस्-तपस्यौ च मधु-माधवौ शुक्रकश् शुचिः । नभो-नभस्यौ चेषोर्जौ सहाश् चैव सहस्यकः ॥
सूर्यगत्यनुगौ चान्द्रौ वैदिकद्विजसम्मतौ । द्वौद्वौ तपःप्रभृतिकौ मासावृतुरिहोदितः ॥
शिशिरश् च वसन्तश् च ग्रीष्मो वर्षास् तथा शरत् । हेमन्तश् चेति ऋतवः क्रमान् मासद्वयात्मकाः ॥
उत्तरायणमत्रोक्तमृतुभिः शिशिरादिभिः । त्रिभिर् वर्षादिभिः प्रोक्तमृतुभिर् दक्षिणायनम् ॥
आर्यावर्ते तु मद्ध्याह्नेऽहस्सु दीर्घतमा यदा । शङ्कोश् छाया ततः सूर्यः प्राप्नुयादुत्तरायणम् ।
आर्यावर्ते हि मद्ध्याह्नेऽहस्सु ह्रस्वतमा यदा । शङ्कोश् छाया ततः सूर्यः प्राप्नुयाद् दक्षिणायनम् ॥
सूर्यस्योदङ्मुखीभावात् स्फुटं याऽमावसी परा । तस्यां तु पूर्णे मासे हि प्रवृत्तं वर्षमिष्यते ॥
तस्य मासस्य या शुक्लप्प्रतिपत् तत एव च । इज्यार्थं वर्षमयनमृतुर् मासश् च गण्यते ॥
द्वाभ्यां हि अयनाभ्यां स्याद् वर्षं सवँवत्सरादिकम् । सवँवत्सरस् तु प्रथमो द्वितीयः परिवत्सरः ॥
ततश् चेदावत्सरश् च तुर्य इद्वत्सरश् श्रुतः । वत्सरः पञ्चमोऽब्दस् स्यात् पञ्चाब्दं तु युगं स्मृतम् ॥
चैत्रशुक्लप्रतिपदि कलेरब्दः प्रवर्तते । अन्येषां तु मते यावतिथः षट्त्रिंशता ततः ॥
न्यूनः कृष्णयुगाब्दस् तु वैदिकानां प्रवर्तते । तपश्शुक्लप्प्रतिपदि तत्पूर्वस्यामिति स्थितिः ॥
तष्टाः कृष्णयुगाब्दास्तु षष्ट्याऽऽदियुगसञ्चयः । लब्धः, शेषे पञ्चभिस्तु तष्टे लब्धं युगं गतम् ॥
शिष्टेऽत्र खे पञ्चमोऽब्दोऽन्यत्र तत्सङ्ख्यवत्सरः । संवत्सरादिषु ज्ञेयो वैदिकैर् ब्राह्मणैः सदा ॥

६. विद्यासु उपवेदेषु च आयुर्वेदः

वार्ता च दण्डनीतिश् च त्रयी चाऽऽन्वीक्षिकीति च । एताश् चतस्रो विद्याः स्युर् लोकसुस्थितिहेतवः ॥
अर्थवेदो धनुर्वेदस् तथा गान्धर्ववेदकः । आयुर्वेदश् चोपवेदा ऋग्वेदादेर् यथाक्रमम् ॥
अनेन पुरुषो यस्मादायुर् विन्दति वेत्ति च । तस्मान् मुनिवरैरेष *आयुर्वेद* इति स्मृतः ॥(भावप्रकाशे १।१।४)
आयुः कामयमानेन धर्मार्थसुखसाधनम् । आयुर्वेदोपदेशेषु विधेयः परमादरः ॥ (अष्टाङ्गहृदये सू. १।२)
न रागान् नाऽप्यविज्ञानादाहारमुपयोजयेत् । परीक्ष्य हितमश्नीयाद् देहो ह्याहारसंभवः ॥(चरकसं.१।२८।४१)
आयुष्यं भोजनं जीर्णे वेगानाञ् चाऽविधारणम् । ब्रह्मचर्यमहिंसा च साहसानाञ् च वर्जनम् ॥(सुश्रु.चि. २८।२८)
प्रसङ्गाद् गात्रसंस्पर्शान् निश्श्वासात् सहभोजनात् । सहशय्यासनाच् चाऽपि वस्त्रमाल्यानुलेपनात् ॥
कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यन्द एव च । औपसर्गिकरोगाश्च सङ्क्रामन्ति नरान् नरम् ॥(सुश्रु.नि.५।३२-३३)
नरो हिताहारविहारसेवी समीक्ष्यकारी विषयेष्वसक्तः ।
दाता समः सत्यपरः क्षमावानाप्तोपसेवी च भवत्यरोगः ॥ (चरकसं. शा. २।४५)

दर्ता नं. १५०९६ ६७९.२२ अ ६८०

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

प्रार्थना

"व्यावहारिकं संस्कृतम्" इत्यस्याः पाठ्यपुस्तकमालायाः तृतीयम्, चतुर्थम्, पञ्चमञ्च च पाठ्यपुस्तकं प्रकाशयितुं सात्त्विकं दानं दातुं वैदिकधर्मसंस्कृति-संस्कृतशिक्षा-प्रेमिणो महानुभावान् सानुनयं प्रार्थयते-

स्वाद्ध्यायशालाकुटुम्बम् ।

स्वाद्ध्यायशालायाः प्रकाशिताः संस्कृतग्रन्थाः-

१) **कौण्डिन्न्यायनशिक्षा-** प्रातिशाक्ख्यादिसर्वसंस्कृतशिक्षाग्रन्थसमीक्षागर्भा महाशिक्षा, आचार्यकौण्डिन्न्यायनेन रचिता, वाराणसीस्थसम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन वाचस्पतिः (डि. लिट्.) इत्युपाधये स्वीकृता (२०४९)-
नै. रू. ६६०।- भा. रू. ४००।-

२) **वेदभाषानिघण्टुः (कौण्डिन्न्यायनकोषः)-** भूलोककाण्डान्तर्गतदेववर्गब्रह्मवर्गात्मकस् सप्रस्ताविकश् शब्दानुक्रमणिकासहितो निदर्शनरूपः, वैदिकलौकिकशब्दानां सङ्ग्रहेण अमरकोषशैल्याम् आचार्यकौण्डिन्न्यायनेन रचितः (२०५०) -
नै. रू. ४०।- भा. रू. २५।-

३) **काव्यप्रकाशविवृतिः हैमवती** (संस्कृतभाषामयी)- आचार्यकौण्डिन्न्यायनकृता (मोतीलालबनारसीदासेन वाराणस्यां प्रकाशिता, १९८०) - भा. रू. १२०।-

४) कतिपयनैपालसंस्कृतग्रन्थकारपरिचयः (२०४८)- नै. रू. ४०।- भा. रू. २५।-

५) भारतवर्षबहिर्गमनादिदुरितप्रायश्चित्तव्यवस्था (२०४९)-नै. रू. ४०।- भा. रू. २५।-

६) माद्ध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदाध्यायि-निरग्निकद्विज-सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-वैदिकमन्त्र-सङ्ग्रहः (२०५२)-नै. रू. १००।- भा. रू. ६५।-

७) व्यावहारिकं संस्कृतम् (प्रथमम् पुस्तकम्, २०५०)- नै. रू. २०।- भा. रू. १५।-

८) व्यावहारिक संस्कृतम् (द्वितीयम् पुस्तकम्, २०५३)- नै. रू. ३०।- भा. रू. २०।-